# Ashtadhyayi or Sutrapath of Panini

# અષ્ટાધ્યાયી અથવા સૂત્રપાઠ પાણિનીકૃત

## Document Information

Text title : aShTAdhyAyi or sUtrapATha

File name : aShTAdhyAyI.itx

Category : major_works, svara, pANinI

Location : doc_z_misc_major_works

Author : pANinI

Proofread by : Dhananjay Vaidya dvaidya1 at jhmi.edu, Arun arun90 at gmail.com

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Ashtadhyayi or Sutrapath of Panini

# અષ્ટાધ્યાયી અથવા સૂત્રપાઠ પાણિનીકૃત

## ॥ અધ્યાય ૧ ॥

૧.૧.૧ વૃદ્ધિરાદૈચ્ ।

૧.૧.૨ અદેઙ્ ગુણઃ ।

૧.૧.૩ ઇકો ગુણવૃદ્ધી ।

૧.૧.૪ ન ધાતુલોપ આર્ધધાતુકે ।

૧.૧.૫ ક્ઙિતિ ચ ।

૧.૧.૬ દીધીવેવીટામ્ ।

૧.૧.૭ હલોઽનન્તરાઃ સંયોગઃ ।

૧.૧.૮ મુખનાસિકાવચનોઽનુનાસિકઃ ।

૧.૧.૯ તુલ્યાસ્યપ્રયત્નં સવર્ણમ્ ।

૧.૧.૧૦ નાજ્ઝલૌ ।

૧.૧.૧૧ ઈદૂદેદ્દ્વિવચનં પ્રગૃહ્યમ્ ।

૧.૧.૧૨ અદસો માત્ ।

૧.૧.૧૩ શે ।

૧.૧.૧૪ નિપાત એકાજનાઙ્ ।

૧.૧.૧૫ ઓત્ ।

૧.૧.૧૬ સમ્બુદ્ધૌ શાકલ્યસ્યેતાવનાર્ષે ।

૧.૧.૧૭ ઉઞઃ ।

૧.૧.૧૮ ઊઁ ।

૧.૧.૧૯ ઈદૂતૌ ચ સપ્તમ્યર્થે ।

૧.૧.૨૦ દાધા ઘ્વદાપ્ ।

૧.૧.૨૧ આદ્યન્તવદેકસ્મિન્ ।

૧.૧.૨૨ તરપ્તમપૌ ઘઃ ।

૧.૧.૨૩ બહુગણવતુડતિ સંખ્યા ।

૧.૧.૨૪ ષ્ણાન્તા ષટ્ ।

૧.૧.૨૫ ડતિ ચ ।

૧.૧.૨૬ ક્તક્તવતૂ નિષ્ઠા ।

૧.૧.૨૭ સર્વાદીનિ સર્વનામાનિ ।

૧.૧.૨૮ વિભાષા દિક્સમાસે બહુવ્રીહૌ ।

૧.૧.૨૯ ન બહુવ્રીહૌ ।

૧.૧.૩૦ તૃતીયાસમાસે ।

૧.૧.૩૧ દ્વન્દ્વે ચ ।

૧.૧.૩૨ વિભાષા જસિ ।

૧.૧.૩૩ પ્રથમચરમતયાલ્પાર્ધકતિપયનેમાશ્ચ ।

૧.૧.૩૪ પૂર્વપરાવરદક્ષિણોત્તરાપરાધરાણિ

વ્યવસ્થાયામસંજ્ઞાયામ્ ।

૧.૧.૩૫ સ્વમજ્ઞાતિધનાખ્યાયામ્ ।

૧.૧.૩૬ અન્તરં બહિર્યોગોપસંવ્યાનયોઃ ।

૧.૧.૩૭ સ્વરાદિનિપાતમવ્યયમ્ ।

૧.૧.૩૮ તદ્ધિતશ્ચાસર્વવિભક્તિઃ ।

૧.૧.૩૯ કૃન્મેજન્તઃ ।

૧.૧.૪૦ ક્ત્વાતોસુન્કસુનઃ ।

૧.૧.૪૧ અવ્યયીભાવશ્ચ ।

૧.૧.૪૨ શિ સર્વનામસ્થાનમ્ ।

૧.૧.૪૩ સુડનપુંસકસ્ય ।

૧.૧.૪૪ ન વેતિ વિભાષા ।

૧.૧.૪૫ ઇગ્યણઃ સમ્પ્રસારણમ્ ।

૧.૧.૪૬ આદ્યન્તૌ ટકિતૌ ।

૧.૧.૪૭ મિદચોઽન્ત્યાત્પરઃ ।

૧.૧.૪૮ એચ ઇગ્ઘ્રસ્વાદેશે ।

૧.૧.૪૯ ષષ્ઠી સ્થાનેયોગા ।

૧.૧.૫૦ સ્થાનેઽન્તરતમઃ ।

૧.૧.૫૧ ઉરણ્ રપરઃ ।

૧.૧.૫૨ અલોઽન્ત્યસ્ય ।

૧.૧.૫૩ ઙિચ્ચ ।

૧.૧.૫૪ આદેઃ પરસ્ય ।

૧.૧.૫૫ અનેકાલ્શિત્સર્વસ્ય ।

૧.૧.૫૬ સ્થાનિવદાદેશોઽનલ્વિધૌ ।

૧.૧.૫૭ અચઃ પરસ્મિન્ પૂર્વવિધૌ ।

૧.૧.૫૮ ન પદાન્તદ્વિર્વચનવરેયલોપસ્વરસવર્ણાનુસ્વારદીર્ઘ-
જશ્ચર્વિધિષુ ।

૧.૧.૫૯ દ્વિર્વચનેઽચિ ।

૧.૧.૬૦ અદર્શનં લોપઃ ।

૧.૧.૬૧ પ્રત્યયસ્ય લુક્શ્લુલુપઃ ।

૧.૧.૬૨ પ્રત્યયલોપે પ્રત્યયલક્ષણમ્ ।

૧.૧.૬૩ ન લુમતાઽઙ્ગસ્ય ।

૧.૧.૬૪ અચોઽન્ત્યાદિ ટિ ।

૧.૧.૬૫ અલોઽન્ત્યાત્ પૂર્વ ઉપધા ।

૧.૧.૬૬ તસ્મિન્નિતિ નિર્દિષ્ટે પૂર્વસ્ય ।

૧.૧.૬૭ તસ્માદિત્યુત્તરસ્ય ।

૧.૧.૬૮ સ્વં રૂપં શબ્દસ્યાશબ્દસંજ્ઞા ।

૧.૧.૬૯ અણુદિત્ સવર્ણસ્ય ચાપ્રત્યયઃ ।

૧.૧.૭૦ તપરસ્તત્કાલસ્ય ।

૧.૧.૭૧ આદિરન્ત્યેન સહેતા ।

૧.૧.૭૨ યેન વિધિસ્તદન્તસ્ય ।

૧.૧.૭૩ વૃદ્ધિર્યસ્યાચામાદિસ્તદ્ વૃદ્ધમ્ ।

૧.૧.૭૪ ત્યદાદીનિ ચ ।

૧.૧.૭૫ એઙ્ પ્રાચાં દેશે ।

૧.૨.૧ ગાઙ્કુટાદિભ્યોઽઞ્ણિન્ઙ્ ઇત્ ।

૧.૨.૨ વિજ ઇટ્ ।

૧.૨.૩ વિભાષોર્ણોઃ ।

૧.૨.૪ સાર્વધાતુકમપિત્ ।

૧.૨.૫ અસંયોગાલ્લિટ્ કિત્ ।

૧.૨.૬ ઇન્ધિભવતિભ્યાં ચ ।

૧.૨.૭ મૃડમૃદગુધકુષક્લિશવદવસઃ ક્ત્વા ।

૧.૨.૮ રુદવિદમુષગ્રહિસ્વપિપ્રચ્છઃ સઁશ્ચ ।

૧.૨.૯ ઇકો ઝલ્ ।

૧.૨.૧૦ હલન્તાચ્ચ ।

૧.૨.૧૧ લિઙ્સિચાવાત્મનેપદેષુ ।

૧.૨.૧૨ ઉશ્ચ ।

૧.૨.૧૩ વા ગમઃ ।

૧.૨.૧૪ હનઃ સિચ્ ।

૧.૨.૧૫ યમો ગન્ધને ।

૧.૨.૧૬ વિભાષોપયમને ।

૧.૨.૧૭ સ્થાઘ્વોરિચ્ચ ।

૧.૨.૧૮ ન ક્ત્વા સેટ્ ।

૧.૨.૧૯ નિષ્ઠા શીઙ્સ્વિદિમિદિક્ષ્વિદિધૃષઃ ।

૧.૨.૨૦ મૃષસ્તિતિક્ષાયામ્ ।

૧.૨.૨૧ ઉદુપધાદ્ભાવાદિકર્મણોરન્યતરસ્યામ્ ।

૧.૨.૨૨ પૂઙઃ ક્ત્વા ચ ।

૧.૨.૨૩ નોપધાત્થફાન્તાદ્વા ।

૧.૨.૨૪ વઞ્ચિલુઞ્ચ્યૃતશ્ચ ।

૧.૨.૨૫ તૃષિમૃષિકૃશેઃ કાશ્યપસ્ય ।

૧.૨.૨૬ રલો વ્યુપધાદ્ધલાદેઃ સંશ્ચ ।

૧.૨.૨૭ ઊકાલોઽજ્ઝ્રસ્વદીર્ઘપ્લુતઃ ।

૧.૨.૨૮ અચશ્ચ ।

૧.૨.૨૯ ઉચ્ચૈરુદાત્તઃ ।

૧.૨.૩૦ નીચૈરનુદાત્તઃ ।

૧.૨.૩૧ સમાહારઃ સ્વરિતઃ ।

૧.૨.૩૨ તસ્યાદિત ઉદાત્તમર્ધહ્રસ્વમ્ ।

૧.૨.૩૩ એકશ્રુતિ દૂરાત્ સમ્બુદ્ધૌ ।

૧.૨.૩૪ યજ્ઞકર્મણ્યજપન્યૂઙ્ખસામસુ ।

૧.૨.૩૫ ઉચ્ચૈસ્તરાં વા વષટ્કારઃ ।

૧.૨.૩૬ વિભાષા છન્દસિ ।

૧.૨.૩૭ ન સુબ્રહ્મણ્યાયાં સ્વરિતસ્ય તૂદાત્તઃ ।

૧.૨.૩૮ દેવબ્રહ્મણોરનુદાત્તઃ ।

૧.૨.૩૯ સ્વરિતાત્ સંહિતાયામનુદાત્તાનામ્ ।

૧.૨.૪૦ ઉદાત્તસ્વરિતપરસ્ય સન્નતરઃ ।

૧.૨.૪૧ અપૃક્ત એકાલ્ પ્રત્યયઃ ।

૧.૨.૪૨ તત્પુરુષઃ સમાનાધિકરણઃ કર્મધારયઃ ।

૧.૨.૪૩ પ્રથમાનિર્દિષ્ટં સમાસ ઉપસર્જનમ્ ।

૧.૨.૪૪ એકવિભક્તિ ચાપૂર્વનિપાતે ।

૧.૨.૪૫ અર્થવદધાતુરપ્રત્યયઃ પ્રાતિપદિકમ્ ।

૧.૨.૪૬ કૃત્તદ્ધિતસમાસાશ્ચ ।

૧.૨.૪૭ હ્રસ્વો નપુંસકે પ્રાતિપદિકસ્ય ।

૧.૨.૪૮ ગોસ્ત્રિયોરુપસર્જનસ્ય ।

૧.૨.૪૯ લુક્ તદ્ધિતલુકિ ।

૧.૨.૫૦ ઇદ્ગોણ્યાઃ ।

૧.૨.૫૧ લુપિ યુક્તવદ્વ્યક્તિવચને ।

૧.૨.૫૨ વિશેષણાનાં ચાજાતેઃ ।

૧.૨.૫૩ તદશિષ્યં સંજ્ઞાપ્રમાણત્વાત્ ।

૧.૨.૫૪ લુબ્યોગાપ્રખ્યાનાત્ ।

૧.૨.૫૫ યોગપ્રમાણે ચ તદભાવેઽદર્શનં સ્યાત્ ।

૧.૨.૫૬ પ્રધાનપ્રત્યયાર્થવચનમર્થસ્યાન્યપ્રમાણત્વાત્ ।

૧.૨.૫૭ કાલોપસર્જને ચ તુલ્યમ્ ।

૧.૨.૫૮ જાત્યાખ્યાયામેકસ્મિન્ બહુવચનમન્યતરસ્યામ્ ।

૧.૨.૫૯ અસ્મદો દ્વયોશ્ચ ।

૧.૨.૬૦ ફલ્ગુનીપ્રોષ્ઠપદાનાં ચ નક્ષત્રે ।

૧.૨.૬૧ છન્દસિ પુનર્વસ્વોરેકવચનમ્ ।

૧.૨.૬૨ વિશાખયોશ્ચ ।

૧.૨.૬૩ તિષ્યપુનર્વસ્વોર્નક્ષત્રદ્વંદ્વે બહુવચનસ્ય
દ્વિવચનં નિત્યમ્ ।

૧.૨.૬૪ સરૂપાણામેકશેષ એકવિભક્તૌ ।

૧.૨.૬૫ વૃદ્ધો યૂના તલ્લક્ષણશ્ચેદેવ વિશેષઃ ।

૧.૨.૬૬ સ્ત્રી પુંવચ્ચ ।

૧.૨.૬૭ પુમાન્ સ્ત્રિયા ।

૧.૨.૬૮ ભ્રાતૃપુત્રૌ સ્વસૃદુહિતૃભ્યામ્ ।

૧.૨.૬૯ નપુંસકમનપુંસકેનૈકવચ્ચાસ્યાન્યતરસ્યામ્ ।

૧.૨.૭૦ પિતા માત્રા ।

૧.૨.૭૧ શ્વશુરઃ શ્વશ્ર્વા ।

૧.૨.૭૨ ત્યદાદીનિ સર્વૈર્નિત્યમ્ ।

૧.૨.૭૩ ગ્રામ્યપશુસંઘેષુ અતરુણેષુ સ્ત્રી ।

૧.૩.૧ ભૂવાદયો ધાતવઃ ।

૧.૩.૨ ઉપદેશેઽજનુનાસિક ઇત્ ।

૧.૩.૩ હલન્ત્યમ્ ।

૧.૩.૪ ન વિભક્તૌ તુસ્માઃ ।

૧.૩.૫ આદિર્ઞિટુડવઃ ।

૧.૩.૬ ષઃ પ્રત્યયસ્ય ।

૧.૩.૭ ચુટૂ ।

૧.૩.૮ લશક્વતદ્ધિતે ।

૧.૩.૯ તસ્ય લોપઃ ।

૧.૩.૧૦ યથાસંખ્યમ્ અનુદેશઃ સમાનામ્ ।

૧.૩.૧૧ સ્વરિતેનાધિકારઃ ।

૧.૩.૧૨ અનુદાત્તઙિત આત્મનેપદમ્ ।

૧.૩.૧૩ ભાવકર્મણોઃ ।

૧.૩.૧૪ કર્તરિ કર્મવ્યતિહારે ।

૧.૩.૧૫ ન ગતિહિંસાર્થેભ્યઃ ।

૧.૩.૧૬ ઇતરેતરાન્યોન્યોપપદાચ્ચ ।

૧.૩.૧૭ નેર્વિશઃ ।

૧.૩.૧૮ પરિવ્યવેભ્યઃ ક્રિયઃ ।

૧.૩.૧૯ વિપરાભ્યાં જેઃ ।

૧.૩.૨૦ આઙો દોઽનાસ્યવિહરણે ।

૧.૩.૨૧ ક્રીડોઽનુસમ્પરિભ્યશ્ચ ।

૧.૩.૨૨ સમવપ્રવિભ્યઃ સ્થઃ ।

૧.૩.૨૩ પ્રકાશનસ્થેયાખ્યયોશ્ચ ।

૧.૩.૨૪ ઉદોઽનૂર્દ્ધ્વકર્મણિ ।

૧.૩.૨૫ ઉપાન્મન્ત્રકરણે ।

૧.૩.૨૬ અકર્મકાચ્ચ ।

૧.૩.૨૭ ઉદ્વિભ્યાં તપઃ ।

૧.૩.૨૮ આઙો યમહનઃ ।

૧.૩.૨૯ સમો ગમ્યૃચ્છિપ્રચ્છિસ્વરત્યર્તિશ્રુવિદિભ્યઃ ।

૧.૩.૩૦ નિસમુપવિભ્યો હ્વઃ ।

૧.૩.૩૧ સ્પર્દ્ધાયામાઙઃ ।

૧.૩.૩૨ ગન્ધનાવક્ષેપણસેવનસાહસિક્ય-

પ્રતિયત્નપ્રકથનોપયોગેષુ કૃઞઃ ।

૧.૩.૩૩ અધેઃ પ્રસહને ।

૧.૩.૩૪ વેઃ શબ્દકર્મણઃ ।

૧.૩.૩૫ અકર્મકાચ્ચ ।

૧.૩.૩૬ સમ્માનનોત્સઞ્જનાચાર્યકરણજ્ઞાનભૃતિવિગણનવ્યયેષુ નિયઃ ।

૧.૩.૩૭ કર્તૃસ્થે ચાશરીરે કર્મણિ ।

૧.૩.૩૮ વૃત્તિસર્ગતાયનેષુ ક્રમઃ ।

૧.૩.૩૯ ઉપપરાભ્યામ્ ।

૧.૩.૪૦ આઙ ઉદ્ગમને ।

૧.૩.૪૧ વેઃ પાદવિહરણે ।

૧.૩.૪૨ પ્રોપાભ્યાં સમર્થાભ્યામ્ ।

૧.૩.૪૩ અનુપસર્ગાદ્વા ।

૧.૩.૪૪ અપહ્નવે જ્ઞઃ ।

૧.૩.૪૫ અકર્મકાચ્ચ ।

૧.૩.૪૬ સમ્પ્રતિભ્યામનાધ્યાને ।

૧.૩.૪૭ ભાસનોપસમ્ભાષાજ્ઞાનયત્નવિમત્યુપમન્ત્રણેષુ વદઃ ।

૧.૩.૪૮ વ્યક્તવાચાં સમુચ્ચારણે ।

૧.૩.૪૯ અનોરકર્મકાત્ ।

૧.૩.૫૦ વિભાષા વિપ્રલાપે ।

૧.૩.૫૧ અવાદ્ગ્રઃ ।

૧.૩.૫૨ સમઃ પ્રતિજ્ઞાને ।

૧.૩.૫૩ ઉદશ્ચરઃ સકર્મકાત્ ।

૧.૩.૫૪ સમસ્તૃતીયાયુક્તાત્ ।

૧.૩.૫૫ દાણશ્ચ સા ચેચ્ચતુર્થ્યર્થે ।

૧.૩.૫૬ ઉપાદ્યમઃ સ્વકરણે ।

૧.૩.૫૭ જ્ઞાશ્રુસ્મૃદૃશાં સનઃ ।

૧.૩.૫૮ નાનોર્જ્ઞઃ ।

૧.૩.૫૯ પ્રત્યાઙ્ભ્યાં શ્રુવઃ ।

૧.૩.૬૦ શદેઃ શિતઃ ।

૧.૩.૬૧ મ્રિયતેર્લુઙ્લિઙોશ્ચ ।

૧.૩.૬૨ પૂર્વવત્ સનઃ ।

૧.૩.૬૩ આમ્પ્રત્યયવત્ કૃઞોઽનુપ્રયોગસ્ય ।

૧.૩.૬૪ પ્રોપાભ્યાં યુજેરયજ્ઞપાત્રેષુ ।

૧.૩.૬૫ સમઃ ક્ષ્ણુવઃ ।

૧.૩.૬૬ ભુજોઽનવને ।

૧.૩.૬૭ ણેરણૌ યત્ કર્મ ણૌ ચેત્ સ કર્તાઽનાધ્યાને ।

૧.૩.૬૮ ભીસ્મ્યોર્હેતુભયે ।

૧.૩.૬૯ ગૃધિવઞ્ચ્યોઃ પ્રલમ્ભને ।

૧.૩.૭૦ લિયઃ સમ્માનનશાલિનીકરણયોશ્ચ ।

૧.૩.૭૧ મિથ્યોપપદાત્ કૃઞોઽભ્યાસે ।

૧.૩.૭૨ સ્વરિતઞિતઃ કર્ત્રભિપ્રાયે ક્રિયાફલે ।

૧.૩.૭૩ અપાદ્વદઃ ।

૧.૩.૭૪ ણિચશ્ચ ।

૧.૩.૭૫ સમુદાઙ્ભ્યો યમોઽગ્રન્થે ।

૧.૩.૭૬ અનુપસર્ગાજ્જ્ઞઃ ।

૧.૩.૭૭ વિભાષોપપદેન પ્રતીયમાને ।

૧.૩.૭૮ શેષાત્ કર્તરિ પરસ્મૈપદમ્ ।

૧.૩.૭૯ અનુપરાભ્યાં કૃઞઃ ।

૧.૩.૮૦ અભિપ્રત્યતિભ્યઃ ક્ષિપઃ ।

૧.૩.૮૧ પ્રાદ્વહઃ ।

૧.૩.૮૨ પરેર્મૃષઃ ।

૧.૩.૮૩ વ્યાઙ્પરિભ્યો રમઃ ।

૧.૩.૮૪ ઉપાચ્ચ ।

૧.૩.૮૫ વિભાષાઽકર્મકાત્ ।

૧.૩.૮૬ બુધયુધનશજનેઙ્પ્રુદ્રુસ્રુભ્યો ણેઃ ।

૧.૩.૮૭ નિગરણચલનાર્થેભ્યઃ ।

૧.૩.૮૮ અણાવકર્મકાચ્ચિત્તવત્કર્તૃકાત્ ।

૧.૩.૮૯ ન પાદમ્યાઙ્યમાઙ્યસપરિમુહરુચિનૃતિવદવસઃ ।

૧.૩.૯૦ વા ક્યષઃ ।

૧.૩.૯૧ દ્યુદ્ભ્યો લુઙિ ।

૧.૩.૯૨ વૃદ્ભ્યઃ સ્યસનોઃ ।

૧.૩.૯૩ લુટિ ચ કૢપઃ ।

૧.૪.૧ આ કડારાદેકા સંજ્ઞા ।

૧.૪.૨ વિપ્રતિષેધે પરં કાર્યમ્ ।

૧.૪.3 યૂ સ્ત્ર્યાખ્યૌ નદી ।

૧.૪.૪ નેયઙુવઙ્સ્થાનાવસ્ત્રી ।

૧.૪.૫ વાऽऽમિ ।

૧.૪.૬ ઙિતિ હ્રસ્વશ્ચ ।

૧.૪.૭ શેષો ઘ્યસખિ ।

૧.૪.૮ પતિઃ સમાસ એવ ।

૧.૪.૯ ષષ્ઠીયુક્તશ્છન્દસિ વા ।

૧.૪.૧૦ હ્રસ્વં લઘુ ।

૧.૪.૧૧ સંયોગે ગુરુ ।

૧.૪.૧૨ દીર્ઘં ચ ।

૧.૪.૧૩ યસ્માત્ પ્રત્યયવિધિસ્તદાદિ પ્રત્યયેऽઙ્ગમ્ ।

૧.૪.૧૪ સુપ્તિઙન્તં પદમ્ ।

૧.૪.૧૫ નઃ ક્યે ।

૧.૪.૧૬ સિતિ ચ ।

૧.૪.૧૭ સ્વાદિષ્વસર્વનમસ્થાને ।

૧.૪.૧૮ યચિ ભમ્ ।

૧.૪.૧૯ તસૌ મત્વર્થે ।

૧.૪.૨૦ અયસ્મયાદીનિ ચ્છન્દસિ ।

૧.૪.૨૧ બહુષુ બહુવચનમ્ ।

૧.૪.૨૨ દ્વ્યેકયોર્દ્વિવચનૈકવચને ।

૧.૪.૨૩ કારકે ।

૧.૪.૨૪ ધ્રુવમપાયેऽપાદાનમ્ ।

૧.૪.૨૫ ભીત્રાર્થાનાં ભયહેતુઃ ।

૧.૪.૨૬ પરાજેરસોઢઃ ।

૧.૪.૨૭ વારણાર્થાનાં ઈપ્સિતઃ ।

૧.૪.૨૮ અન્તર્દ્ધૌ યેનાદર્શનમિચ્છતિ ।

૧.૪.૨૯ આખ્યાતોપયોગે ।

૧.૪.3૦ જનિકર્તુઃ પ્રકૃતિઃ ।

૧.૪.3૧ ભુવઃ પ્રભવઃ ।

૧.૪.3૨ કર્મણા યમભિપ્રૈતિ સ સમ્પ્રદાનમ્ ।

૧.૪.33 રુચ્યર્થાનાં પ્રીયમાણઃ ।

૧.૪.3૪ શ્લાઘહ્નુઙ્સ્થાશપાં જ્ઞીપ્સ્યમાનઃ ।

૧.૪.૩૫ ધારેરુત્તમર્ણઃ ।

૧.૪.૩૬ સ્પૃહેરીપ્સિતઃ ।

૧.૪.૩૭ ક્રુધદ્રુહેર્ષ્યાઽસૂયાર્થાનાં યં પ્રતિ કોપઃ ।

૧.૪.૩૮ ક્રુધદ્રુહોરુપસૃષ્ટયોઃ કર્મ ।

૧.૪.૩૯ રાધીક્ષ્યોર્યસ્ય વિપ્રશ્નઃ ।

૧.૪.૪૦ પ્રત્યાઙ્ભ્યાં શ્રુવઃ પૂર્વસ્ય કર્તા ।

૧.૪.૪૧ અનુપ્રતિગૃણશ્ચ ।

૧.૪.૪૨ સાધકતમં કરણમ્ ।

૧.૪.૪૩ દિવઃ કર્મ ચ ।

૧.૪.૪૪ પરિક્રયણે સમ્પ્રદાનમન્યતરસ્યામ્ ।

૧.૪.૪૫ આધારોઽધિકરણમ્ ।

૧.૪.૪૬ અધિશીઙ્સ્થાઽઽસાં કર્મ ।

૧.૪.૪૭ અભિનિવિશશ્ચ ।

૧.૪.૪૮ ઉપાન્વધ્યાઙ્વસઃ ।

૧.૪.૪૯ કર્તુરીપ્સિતતમં કર્મ ।

૧.૪.૫૦ તથાયુક્તં ચાનિપ્સીતમ્ ।

૧.૪.૫૧ અકથિતં ચ ।

૧.૪.૫૨ ગતિબુદ્ધિપ્રત્યવસાનાર્થશબ્દકર્માકર્મકાણામણિ કર્તા
સ ણૌ ।

૧.૪.૫૩ હૃક્રોરન્યતરસ્યામ્ ।

૧.૪.૫૪ સ્વતન્ત્રઃ કર્તા ।

૧.૪.૫૫ તત્પ્રયોજકો હેતુશ્ચ ।

૧.૪.૫૬ પ્રાગ્રીશ્વરાન્નિપાતઃ ।

૧.૪.૫૭ ચાદયોઽસત્ત્વે ।

૧.૪.૫૮ પ્રાદયઃ ।

૧.૪.૫૯ ઉપસર્ગાઃ ક્રિયાયોગે ।

૧.૪.૬૦ ગતિશ્ચ ।

૧.૪.૬૧ ઊર્યાદિચ્વિડાચશ્ચ ।

૧.૪.૬૨ અનુકરણં ચાનિતિપરમ્ ।

૧.૪.૬૩ આદરાનાદરયોઃ સદસતી ।

૧.૪.૬૪ ભૂષણેઽલમ્ ।

૧.૪.૬૫ અન્તરપરિગ્રહે ।

૧.૪.૬૬ કણેમનસી શ્રદ્ધાપ્રતીઘાતે ।

૧.૪.૬૭ પુરોઽવ્યયમ્ ।

૧.૪.૬૮ અસ્તં ચ ।

૧.૪.૬૯ અચ્છ ગત્યર્થવદેષુ ।

૧.૪.૭૦ અદોઽનુપદેશે ।

૧.૪.૭૧ તિરોઽન્તર્ધૌ । variationર્દ્ધૌ

૧.૪.૭૨ વિભાષા કૃઞિ ।

૧.૪.૭૩ ઉપાજેઽન્વાજે ।

૧.૪.૭૪ સાક્ષાત્પ્રભૃતીનિ ચ ।

૧.૪.૭૫ અનત્યાધાન ઉરસિમનસી ।

૧.૪.૭૬ મધ્યેપદેનિવચને ચ ।

૧.૪.૭૭ નિત્યં હસ્તે પાણાવુપયમને ।

૧.૪.૭૮ પ્રાધ્વં બન્ધને ।

૧.૪.૭૯ જીવિકોપનિષદાવૌપમ્યે ।

૧.૪.૮૦ તે પ્રાગ્ધાતોઃ ।

૧.૪.૮૧ છન્દસિ પરેઽપિ ।

૧.૪.૮૨ વ્યવહિતાશ્ચ ।

૧.૪.૮૩ કર્મપ્રવચનીયાઃ ।

૧.૪.૮૪ અનુર્લક્ષણે ।

૧.૪.૮૫ તૃતીયાઽર્થે ।

૧.૪.૮૬ હીને ।

૧.૪.૮૭ ઉપોઽધિકે ચ ।

૧.૪.૮૮ અપપરી વર્જને ।

૧.૪.૮૯ આઙ્ મર્યાદાવચને ।

૧.૪.૯૦ લક્ષણેત્થમ્ભૂતાખ્યાનભાગવીપ્સાસુ પ્રતિપર્યનવઃ ।

૧.૪.૯૧ અભિરભાગે ।

૧.૪.૯૨ પ્રતિઃ પ્રતિનિધિપ્રતિદાનયોઃ ।

૧.૪.૯૩ અધિપરી અનર્થકૌ ।

૧.૪.૯૪ સુઃ પૂજાયામ્ ।

૧.૪.૯૫ અતિરતિક્રમણે ચ ।

૧.૪.૯૬ અપિઃ પદાર્થસમ્ભાવનાન્વવસર્ગગર્હાસમુચ્ચયેષુ ।

૧.૪.૯૭ અધિરીશ્વરે ।

૧.૪.૯૮ વિભાષા કૃઞિ ।

૧.૪.૯૯ લઃ પરસ્મૈપદમ્ ।

૧.૪.૧૦૦ તઙાનાવાત્મનેપદમ્ ।

૧.૪.૧૦૧ તિઙસ્ત્રીણિ ત્રીણિ પ્રથમમધ્યમોત્તમાઃ ।

૧.૪.૧૦૨ તાન્યેકવચનદ્વિવચનબહુવચનાન્યેકશઃ ।

૧.૪.૧૦૩ સુપઃ ।

૧.૪.૧૦૪ વિભક્તિશ્ચ ।

૧.૪.૧૦૫ યુષ્મદ્યુપપદે સમાનાધિકરણે સ્થાનિન્યપિ મધ્યમઃ ।

૧.૪.૧૦૬ પ્રહાસે ચ મન્યોપપદે મન્યતેરુત્તમ એકવચ્ચ ।

૧.૪.૧૦૭ અસ્મદ્યુત્તમઃ ।

૧.૪.૧૦૮ શેષે પ્રથમઃ ।

૧.૪.૧૦૯ પરઃ સંનિકર્ષઃ સંહિતા ।

૧.૪.૧૧૦ વિરામોઽવસાનમ્ ।

## ॥ અધ્યાય ૨ ॥

૨.૧.૧ સમર્થઃ પદવિધિઃ ।

૨.૧.૨ સુબામન્ત્રિતે પરાઙ્ગવત્ સ્વરે ।

૨.૧.૩ પ્રાક્ કડારાત્ સમાસઃ ।

૨.૧.૪ સહ સુપા ।

૨.૧.૫ અવ્યયીભાવઃ ।

૨.૧.૬ અવ્યયં વિભક્તિસમીપસમૃદ્ધિ-
વ્યૃદ્ધ્યર્થાભાવાત્યયાસમ્પ્રતિ-
શબ્દપ્રાદુર્ભાવપશ્ચાદ્યથાઽઽનુપૂર્વ્યયૌગપદ્યસાદૃશ્ય-
સમ્પત્તિસાકલ્યાન્તવચનેષુ ।

૨.૧.૭ યથાઽસાદૃયે ।

૨.૧.૮ યાવદવધારણે ।

૨.૧.૯ સુપ્પ્રતિના માત્રાઽર્થે ।

૨.૧.૧૦ અક્ષશલાકાસંખ્યાઃ પરિણા ।

૨.૧.૧૧ વિભાષા ।

૨.૧.૧૨ અપપરિબહિરઞ્ચવઃ પઞ્ચમ્યા ।

૨.૧.૧૩ આઙ્ મર્યાદાऽભિવિધ્યોઃ ।

૨.૧.૧૪ લક્ષણેનાભિપ્રતી આભિમુખ્યે ।

૨.૧.૧૫ અનુર્યત્સમયા ।

૨.૧.૧૬ યસ્ય ચાયામઃ ।

૨.૧.૧૭ તિષ્ઠદ્ગુપ્રભૃતીનિ ચ ।

૨.૧.૧૮ પારે મધ્યે ષષ્ઠ્યા વા ।

૨.૧.૧૯ સંખ્યા વંશ્યેન ।

૨.૧.૨૦ નદીભિશ્ચ ।

૨.૧.૨૧ અન્યપદાર્થે ચ સંજ્ઞાયામ્ ।

૨.૧.૨૨ તત્પુરુષઃ ।

૨.૧.૨૩ દ્વિગુશ્ચ ।

૨.૧.૨૪ દ્વિતીયા શ્રિતાતીતપતિતગતાત્યસ્તપ્રાપ્તાપન્નૈઃ ।

૨.૧.૨૫ સ્વયં ક્તેન ।

૨.૧.૨૬ ખટ્વા ક્ષેપે ।

૨.૧.૨૭ સામિ ।

૨.૧.૨૮ કાલાઃ ।

૨.૧.૨૯ અત્યન્તસંયોગે ચ ।

૨.૧.૩૦ તૃતીયા તત્કૃતાર્થેન ગુણવચનેન ।

૨.૧.૩૧ પૂર્વસદૃશસમોનાર્થકલહનિપુણમિશ્રશ્લક્ષ્ણૈઃ ।

૨.૧.૩૨ કર્તૃકરણે કૃતા બહુલમ્ ।

૨.૧.૩૩ કૃત્યૈરધિકાર્થવચને ।

૨.૧.૩૪ અન્નેન વ્યઞ્જનમ્ ।

૨.૧.૩૫ ભક્ષ્યેણ મિશ્રીકરણમ્ ।

૨.૧.૩૬ ચતુર્થી તદર્થાર્થબલિહિતસુખરક્ષિતૈઃ ।

૨.૧.૩૭ પઞ્ચમી ભયેન ।

૨.૧.૩૮ અપેતાપોઢમુક્તપતિતાપત્રસ્તૈરલ્પશઃ ।

૨.૧.૩૯ સ્તોકાન્તિકદૂરાર્થકૃચ્છ્રાણિ ક્તેન ।

૨.૧.૪૦ સપ્તમી શૌણ્ડૈઃ ।

૨.૧.૪૧ સિદ્ધશુષ્કપક્વબન્ધૈશ્ચ ।

૨.૧.૪૨ ધ્વાઙ્ક્ષેણ ક્ષેપે ।

૨.૧.૪૩ કૃત્યૈરૃણે ।

૨.૧.૪૪ સંજ્ઞાયામ્ ।

૨.૧.૪૫ ક્તેનાહોરાત્રાવયવાઃ ।

૨.૧.૪૬ તત્ર ।

૨.૧.૪૭ ક્ષેપે ।

૨.૧.૪૮ પાત્રેસમિતાદયશ્ચ ।

૨.૧.૪૯ પૂર્વકાલૈકસર્વજરત્પુરાણનવકેવલાઃ સમાનાધિકરણેન ।

૨.૧.૫૦ દિક્સંખ્યે સંજ્ઞાયામ્ ।

૨.૧.૫૧ તદ્ધિતાર્થોત્તરપદસમાહારે ચ ।

૨.૧.૫૨ સંખ્યાપૂર્વો દ્વિગુઃ ।

૨.૧.૫૩ કુત્સિતાનિ કુત્સનૈઃ ।

૨.૧.૫૪ પાપાણકે કુત્સિતૈઃ ।

૨.૧.૫૫ ઉપમાનાનિ સામાન્યવચનૈઃ ।

૨.૧.૫૬ ઉપમિતં વ્યાઘ્રાદિભિઃ સામાન્યાપ્રયોગે ।

૨.૧.૫૭ વિશેષણં વિશેષ્યેણ બહુલમ્ ।

૨.૧.૫૮ પૂર્વાપરપ્રથમચરમજઘન્યસમાન-
મધ્યમધ્યમવીરાશ્ચ ।

૨.૧.૫૯ શ્રેણ્યાદયઃ કૃતાદિભિઃ ।

૨.૧.૬૦ ક્તેન નઞ્વિશિષ્ટેનાનઞ્ ।

૨.૧.૬૧ સન્મહત્પરમોત્તમોત્કૃષ્ટાઃ પૂજ્યમાનૈઃ ।

૨.૧.૬૨ વૃન્દારકનાગકુઞ્જરૈઃ પૂજ્યમાનમ્ ।

૨.૧.૬૩ કતરકતમૌ જાતિપરિપ્રશ્ને ।

૨.૧.૬૪ કિં ક્ષેપે ।

૨.૧.૬૫ પોટાયુવતિસ્તોકકતિપયગૃષ્ટિધેનુવશા-
વેહત્બષ્કયણીપ્રવક્તૃ- શ્રોત્રિયાધ્યાપકધૂર્તૈર્જાતિઃ ।

૨.૧.૬૬ પ્રશંસાવચનૈશ્ચ ।

૨.૧.૬૭ યુવા ખલતિપલિતવલિનજરતીભિઃ ।

૨.૧.૬૮ કૃત્યતુલ્યાખ્યા અજાત્યા ।

૨.૧.૬૯ વર્ણો વર્ણેન ।

૨.૧.૭૦ કુમારઃ શ્રમણાऽऽદિભિઃ ।

૨.૧.૭૧ ચતુષ્પાદો ગર્ભિણ્યા ।

૨.૧.૭૨ મયૂરવ્યંસકાદયશ્ચ ।

૨.૨.૧ પૂર્વાપરાધરોત્તરમેકદેશિનૈકાધિકરણે ।

૨.૨.૨ અર્ધં નપુંસકમ્ ।

૨.૨.૩ દ્વિતીયતૃતીયચતુર્થતુર્યાણ્યન્યતરસ્યામ્ ।

૨.૨.૪ પ્રાપ્તાપન્ને ચ દ્વિતીયયા ।

૨.૨.૫ કાલાઃ પરિમાણિના ।

૨.૨.૬ નઞ્ ।

૨.૨.૭ ઈષદકૃતા ।

૨.૨.૮ ષષ્ઠી ।

૨.૨.૯ યાજકાદિભિશ્ચ ।

૨.૨.૧૦ ન નિર્ધારણે ।

૨.૨.૧૧ પૂરણગુણસુહિતાર્થસદવ્યયતવ્યસમાનાધિકરણેન ।

૨.૨.૧૨ ક્તેન ચ પૂજાયામ્ ।

૨.૨.૧૩ અધિકરણવાચિના ચ ।

૨.૨.૧૪ કર્મણિ ચ ।

૨.૨.૧૫ તૃજકાભ્યાં કર્તરિ ।

૨.૨.૧૬ કર્ત્તરિ ચ ।

૨.૨.૧૭ નિત્યં ક્રીડાજીવિકયોઃ ।

૨.૨.૧૮ કુગતિપ્રાદયઃ ।

૨.૨.૧૯ ઉપપદમતિઙ્ ।

૨.૨.૨૦ અમૈવાવ્યયેન ।

૨.૨.૨૧ તૃતીયાપ્રભૃતીન્યન્યતરસ્યામ્ ।

૨.૨.૨૨ ક્ત્વા ચ ।

૨.૨.૨૩ શેષો બહુવ્રીહિઃ ।

૨.૨.૨૪ અનેકમન્યપદાર્થે ।

૨.૨.૨૫ સંખ્યયાઽવ્યયાસન્નાદૂરાધિકસંખ્યાઃ સંખ્યેયે ।

૨.૨.૨૬ દિઙ્નામાન્યન્તરાલે ।

૨.૨.૨૭ તત્ર તેનેદમિતિ સરૂપે ।

૨.૨.૨૮ તેન સહેતિ તુલ્યયોગે ।

૨.૨.૨૯ ચાર્થે દ્વંદ્વઃ ।

૨.૨.૩૦ ઉપસર્જનં પૂર્વમ્ ।

૨.૨.૩૧ રાજદન્તાદિષુ પરમ્ ।

૨.૨.૩૨ દ્વંદ્વે ઘિ ।

૨.૨.૩૩ અજાદ્યદન્તમ્ ।

૨.૨.૩૪ અલ્પાચ્તરમ્ ।

૨.૨.૩૫ સપ્તમીવિશેષણે બહુવ્રીહૌ ।

૨.૨.૩૬ નિષ્ઠા ।

૨.૨.૩૭ વાઽઽહિતાગ્ન્યાદિષુ ।

૨.૨.૩૮ કડારાઃ કર્મધરાયે ।

૨.૩.૧ અનભિહિતે ।

૨.૩.૨ કર્મણિ દ્વિતીયા ।

૨.૩.૩ તૃતીયા ચ હોશ્છન્દસિ ।

૨.૩.૪ અન્તરાઽન્તરેણ યુક્તે ।

૨.૩.૫ કાલાધ્વનોરત્યન્તસંયોગે ।

૨.૩.૬ અપવર્ગે તૃતીયા ।

૨.૩.૭ સપ્તમીપઞ્ચમ્યૌ કારકમધ્યે ।

૨.૩.૮ કર્મપ્રવચનીયયુક્તે દ્વિતીયા ।

૨.૩.૯ યસ્માદધિકં યસ્ય ચેશ્વરવચનં તત્ર સપ્તમી ।

૨.૩.૧૦ પઞ્ચમી અપાઙ્પરિભિઃ ।

૨.૩.૧૧ પ્રતિનિધિપ્રતિદાને ચ યસ્માત્ ।

૨.૩.૧૨ ગત્યર્થકર્મણિ દ્વિતીયાચતુર્થ્યૌ ચેષ્ટાયામનધ્વનિ ।

૨.૩.૧૩ ચતુર્થી સમ્પ્રદાને ।

૨.૩.૧૪ ક્રિયાર્થોપપદસ્ય ચ કર્મણિ સ્થાનિનઃ ।

૨.૩.૧૫ તુમર્થાચ્ચ ભાવવચનાત્ ।

૨.૩.૧૬ નમઃસ્વસ્તિસ્વાહાસ્વધાલંવષડ્યોગાચ્ચ ।

૨.૩.૧૭ મન્યકર્મણ્યનાદરે વિભાષાઽપ્રાણિષુ ।

૨.૩.૧૮ કર્તૃકરણયોસ્તૃતીયા ।

૨.૩.૧૯ સહયુક્તેઽપ્રધાને ।

૨.૩.૨૦ યેનાઙ્ગવિકારઃ ।

૨.૩.૨૧ ઇત્થંભૂતલક્ષણે ।

૨.૩.૨૨ સંજ્ઞોઽન્યતરસ્યાં કર્મણિ ।

૨.૩.૨૩ હેતૌ ।

૨.૩.૨૪ અકર્તર્યૃણે પઞ્ચમી ।

૨.૩.૨૫ વિભાષા ગુણેઽસ્ત્રિયામ્ ।

૨.૩.૨૬ ષષ્ઠી હેતુપ્રયોગે ।

૨.૩.૨૭ સર્વનામ્નસ્તૃતીયા ચ ।

૨.૩.૨૮ અપાદાને પઞ્ચમી ।

૨.૩.૨૯ અન્યારાદિતરર્ત્તેદિક્શબ્દાઞ્ચૂત્તરપદાજાહિયુક્તે ।

૨.૩.૩૦ ષષ્ઠ્યતસર્થપ્રત્યયેન ।

૨.૩.૩૧ એનપા દ્વિતીયા ।

૨.૩.૩૨ પૃથગ્વિનાનાનાભિસ્તૃતીયાઽન્યતરસ્યામ્ ।

૨.૩.૩૩ કરણે ચ સ્તોકાલ્પકૃચ્છ્રકતિપયસ્યાસત્ત્વવચનસ્ય ।

૨.૩.૩૪ દૂરાન્તિકાર્થૈઃ ષષ્ઠ્યન્યતરસ્યામ્ ।

૨.૩.૩૫ દૂરાન્તિકાર્થેભ્યો દ્વિતીયા ચ ।

૨.૩.૩૬ સપ્તમ્યધિકરણે ચ ।

૨.૩.૩૭ યસ્ય ચ ભાવેન ભાવલક્ષણમ્ ।

૨.૩.૩૮ ષષ્ઠી ચાનાદરે ।

૨.૩.૩૯ સ્વામીશ્વરાધિપતિદાયાદસાક્ષિપ્રતિભૂપ્રસૂતૈશ્ચ ।

૨.૩.૪૦ આયુક્તકુશલાભ્યાં ચાસેવાયામ્ ।

૨.૩.૪૧ યતશ્ચ નિર્ધારણમ્ ।

૨.૩.૪૨ પઞ્ચમી વિભક્તે ।

૨.૩.૪૩ સાધુનિપુણાભ્યામ્ અર્ચાયાં સપ્તમ્યપ્રતેઃ ।

૨.૩.૪૪ પ્રસિતોત્સુકાભ્યાં તૃતીયા ચ ।

૨.૩.૪૫ નક્ષત્રે ચ લુપિ ।

૨.૩.૪૬ પ્રાતિપદિકાર્થલિઙ્ગપરિમાણવચનમાત્રે પ્રથમા ।

૨.૩.૪૭ સમ્બોધને ચ ।

૨.૩.૪૮ સાઽઽમન્ત્રિતમ્ ।

૨.૩.૪૯ એકવચનં સંબુદ્ધિઃ ।

૨.૩.૫૦ ષષ્ઠી શેષે ।

૨.૩.૫૧ જ્ઞોઽવિદર્થસ્ય કરણે ।

૨.૩.૫૨ અધીગર્થદયેશાં કર્મણિ ।

૨.૩.૫૩ કૃઞઃ પ્રતિયત્ને ।

૨.૩.૫૪ રુજાર્થાનાં ભાવવચનાનામજ્વરેઃ ।

૨.૩.૫૫ આશિષિ નાથઃ ।

૨.૩.૫૬ જાસિનિપ્રહણનાટક્રાથપિષાં હિંસાયામ્ ।

૨.૩.૫૭ વ્યવહૃપણોઃ સમર્થયોઃ ।

૨.૩.૫૮ દિવસ્તદર્થસ્ય ।

૨.૩.૫૯ વિભાષોપસર્ગે ।

૨.૩.૬૦ દ્વિતીયા બ્રાહ્મણે ।

૨.૩.૬૧ પ્રેષ્યબ્રુવોર્હવિષો દેવતાસમ્પ્રદાને ।
૨.૩.૬૨ ચતુર્થ્યર્થે બહુલં છન્દસિ ।
૨.૩.૬૩ યજેશ્ચ કરણે ।
૨.૩.૬૪ કૃત્વોઽર્થપ્રયોગે કાલેઽધિકરણે ।
૨.૩.૬૫ કર્તૃકર્મણોઃ કૃતિ ।
૨.૩.૬૬ ઉભયપ્રાપ્તૌ કર્મણિ ।
૨.૩.૬૭ ક્તસ્ય ચ વર્તમાને ।
૨.૩.૬૮ અધિકરણવાચિનશ્ચ ।
૨.૩.૬૯ ન લોકાવ્યયનિષ્ઠાખલર્થતૃનામ્ ।
૨.૩.૭૦ અકેનોર્ભવિષ્યદાધમણ્ર્યયોઃ ।
૨.૩.૭૧ કૃત્યાનાં કર્તરિ વા ।
૨.૩.૭૨ તુલ્યાર્થૈરતુલોપમાભ્યાં તૃતીયાઽન્યતરસ્યામ્ ।
૨.૩.૭૩ ચતુર્થી ચાશિષ્યાયુષ્યમદ્રભદ્ર-
કુશલસુખાર્થહિતૈઃ ।
૨.૪.૧ દ્વિગુરેકવચનમ્ ।
૨.૪.૨ દ્વંદ્વશ્ચ પ્રાણિતૂર્યસેનાઙ્ગાનામ્ ।
૨.૪.૩ અનુવાદે ચરણાનામ્ ।
૨.૪.૪ અધ્વર્યુક્રતુરનપુંસકમ્। ।
૨.૪.૫ અધ્યયનતોઽવિપ્રકૃષ્ટાખ્યાનામ્ ।
૨.૪.૬ જાતિરપ્રાણિનામ્ ।
૨.૪.૭ વિશિષ્ટલિઙ્ગો નદી દેશોઽગ્રામાઃ ।
૨.૪.૮ ક્ષુદ્રજન્તવઃ ।
૨.૪.૯ યેષાં ચ વિરોધઃ શાશ્વતિકઃ ।
૨.૪.૧૦ શૂદ્રાણામનિરવસિતાનામ્ ।
૨.૪.૧૧ ગવાશ્વપ્રભૃતીનિ ચ ।
૨.૪.૧૨ વિભાષા વૃક્ષમૃગતૃણધાન્યવ્યઞ્જન-
પશુશકુન્યશ્વવડવપૂર્વાપરાધરોત્તરાણામ્ ।
૨.૪.૧૩ વિપ્રતિષિદ્ધં ચાનધિકરણવાચિ ।
૨.૪.૧૪ ન દધિપયાદીનિ ।
૨.૪.૧૫ અધિકરણૈતાવત્ત્વે ચ ।
૨.૪.૧૬ વિભાષા સમીપે ।
૨.૪.૧૭ સ નપુંસકમ્ ।

૨.૪.૧૮ અવ્યયીભાવશ્ચ ।

૨.૪.૧૯ તત્પુરુષોઽનઞ્ કર્મધારયઃ ।

૨.૪.૨૦ સંજ્ઞાયાં કન્થોશીનરેષુ ।

૨.૪.૨૧ ઉપજ્ઞોપક્રમં તદાદ્યાચિખ્યાસાયામ્ ।

૨.૪.૨૨ છાયા બાહુલ્યે ।

૨.૪.૨૩ સભા રાજાઽમનુષ્યપૂર્વા ।

૨.૪.૨૪ અશાલા ચ ।

૨.૪.૨૫ વિભાષા સેનાસુરાછાયાશાલાનિશાનામ્ ।

૨.૪.૨૬ પરવલ્લિઙ્ગં દ્વંદ્વતત્પુરુષયોઃ ।

૨.૩.૨૭ પૂર્વવદશ્વવડવૌ ।

૨.૪.૨૮ હેમન્તશિશિરાવહોરાત્રે ચ ચ્છન્દસિ ।

૨.૪.૨૯ રાત્રાહ્નાહાઃ પુંસિ ।

૨.૪.૩૦ અપથં નપુંસકમ્ ।

૨.૪.૩૧ અર્ધર્ચાઃ પુંસિ ચ ।

૨.૪.૩૨ ઇદમોઽન્વાદેશેઽશનુદાત્તસ્તૃતીયાઽઽદૌ ।

૨.૪.૩૩ એતદસ્ત્રતસોસ્ત્રતસૌ ચાનુદાત્તૌ ।

૨.૪.૩૪ દ્વિતીયાટૌસ્સ્વેનઃ ।

૨.૪.૩૫ આર્દ્ધધાતુકે ।

૨.૪.૩૬ અદો જગ્ધિર્લ્યપ્તિ કિતિ ।

૨.૪.૩૭ લુઙ્સનોર્ઘસ્લૃ ।

૨.૪.૩૮ ઘઞપોશ્ચ ।

૨.૪.૩૯ બહુલં છન્દસિ ।

૨.૪.૪૦ લિટ્યન્યતરસ્યામ્ ।

૨.૪.૪૧ વેઞો વયિઃ ।

૨.૪.૪૨ હનો વધ લિઙિ ।

૨.૪.૪૩ લુઙિ ચ ।

૨.૪.૪૪ આત્મનેપદેષ્વન્યતરસ્યામ્ ।

૨.૪.૪૫ ઇણો ગા લુઙિ ।

૨.૪.૪૬ ણૌ ગમિરબોધને ।

૨.૪.૪૭ સનિ ચ ।

૨.૪.૪૮ ઇઙશ્ચ ।

૨.૪.૪૯ ગાઙ્ લિટિ ।

૨.૪.૫૦ વિભાષા લુઙ્લૃઙોઃ ।

૨.૪.૫૧ ણૌ ચ સઁશ્ચઙોઃ ।

૨.૪.૫૨ અસ્તેર્ભૂઃ ।

૨.૪.૫૩ બ્રુવો વચિઃ ।

૨.૪.૫૪ ચક્ષિઙઃ ખ્યાઞ્ ।

૨.૪.૫૫ વા લિટિ ।

૨.૪.૫૬ અજેર્વ્યઘઞપોઃ ।

૨.૪.૫૭ વા યૌ ।

૨.૪.૫૮ ણ્યક્ષત્રિયાર્ષઞિતો યૂનિ લુગણિઞોઃ ।

૨.૪.૫૯ પૈલાદિભ્યશ્ચ ।

૨.૪.૬૦ ઇઞઃ પ્રાચામ્ ।

૨.૪.૬૧ ન તૌલ્વલિભ્યઃ ।

૨.૪.૬૨ તદ્રાજસ્ય બહુષુ તેનૈવાસ્ત્રિયામ્ ।

૨.૪.૬૩ યસ્કાદિભ્યો ગોત્રે ।

૨.૪.૬૪ યઞઞોશ્ચ ।

૨.૪.૬૫ અત્રિભૃગુકુત્સવસિષ્ઠગોતમાઙ્ગિરોભ્યશ્ચ ।

૨.૪.૬૬ બહ્વચઃ ઇઞઃ પ્રાચ્યભરતેષુ ।

૨.૪.૬૭ ન ગોપવનાદિભ્યઃ ।

૨.૪.૬૮ તિકકિતવાદિભ્યો દ્વંદ્વે ।

૨.૪.૬૯ ઉપકાદિભ્યોઽન્યતરસ્યામદ્વંદ્વે ।

૨.૪.૭૦ આગસ્ત્યકૌણ્ડિન્યયોરગસ્તિકુણ્ડિનચ્ ।

૨.૪.૭૧ સુપો ધાતુપ્રાતિપદિકયોઃ ।

૨.૪.૭૨ અદિપ્રભૃતિભ્યઃ શપઃ ।

૨.૪.૭૩ બહુલં છન્દસિ ।

૨.૪.૭૪ યઙોઽચિ ચ ।

૨.૪.૭૫ જુહોત્યાદિભ્યઃ શ્લુઃ ।

૨.૪.૭૬ બહુલં છન્દસિ ।

૨.૪.૭૭ ગાતિસ્થાઘુપાભૂભ્યઃ સિચઃ પરસ્મૈપદેષુ ।

૨.૪.૭૮ વિભાષા ઘ્રાધેટ્શાચ્છાસઃ ।

૨.૪.૭૯ તનાદિભ્યસ્તથાસોઃ ।

૨.૪.૮૦ મન્ત્રે ઘસહ્વરણશવૃદહાદ્વૃચ્કૃગમિજનિભ્યો લેઃ ।

૨.૪.૮૧ આમઃ ।

૨.૪.૮૨ અવ્યયાદાપ્સુપઃ ।

૨.૪.૮૩ નાવ્યયીભાવાદતોઽમ્ત્વપઞ્ચમ્યાઃ ।

૨.૪.૮૪ તૃતીયાસપ્તમ્યોર્બહુલમ્ ।

૨.૪.૮૫ લુટઃ પ્રથમસ્ય ડારૌરસઃ ।

## ॥ અધ્યાય ૩ ॥

૩.૧.૧ પ્રત્યયઃ ।

૩.૧.૨ પરશ્ચ ।

૩.૧.૩ આદ્યુદાત્તશ્ચ ।

૩.૧.૪ અનુદત્તૌ સુપ્પિતૌ ।

૩.૧.૫ ગુપ્તિજ્કિદ્ભ્યઃ સન્ ।

૩.૧.૬ માન્બધદાન્શાન્ભ્યો દીર્ઘશ્ચાભ્યાસસ્ય ।

૩.૧.૭ ધાતોઃ કર્મણઃ સમાનકર્તૃકાદિચ્છાયાં વા ।

૩.૧.૮ સુપ આત્મનઃ ક્યચ્ ।

૩.૧.૯ કામ્યચ્ચ ।

૩.૧.૧૦ ઉપમાનાદાચારે ।

૩.૧.૧૧ કર્તુઃ ક્યઙ્ સલોપશ્ચ ।

૩.૧.૧૨ ભૃશાદિભ્યો ભુવ્યચ્વેર્લોપશ્ચ હલઃ ।

૩.૧.૧૩ લોહિતાદિડાજ્ભ્યઃ ક્યષ્।

૩.૧.૧૪ કષ્ટાય ક્રમણે ।

૩.૧.૧૫ કર્મણઃ રોમન્થતપોભ્યાં વર્તિચરોઃ ।

૩.૧.૧૬ બાષ્પોષ્માભ્યાં ઉદ્વમને ।

૩.૧.૧૭ શબ્દવૈરકલહાભ્રકણ્વમેઘેભ્યઃ કરણે ।

૩.૧.૧૮ સુખાદિભ્યઃ કર્તૃવેદનાયામ્ ।

૩.૧.૧૯ નમોવરિવશ્ચિત્રઙઃ ક્યચ્ ।

૩.૧.૨૦ પુચ્છભાણ્ડચીવરાણ્ણિઙ્ ।

૩.૧.૨૧ મુણ્ડમિશ્રશ્લક્ષ્ણલવણવ્રતવસ્ત્રહલકલકૃતતૂસ્તેભ્યો
ણિચ્ ।

૩.૧.૨૨ ધાતોરેકાચો હલાદેઃ ક્રિયાસમભિહારે યઙ્ ।

૩.૧.૨૩ નિત્યં કૌટિલ્યે ગતૌ ।

૩.૧.૨૪ લુપસદચરજપજભદહદશગૃભ્યો ભાવગર્હાયામ્ ।

૩.૧.૨૫ સત્યાપપાશરૂપવીણાતૂલશ્લોકસેનાલોમત્વચવર્મવર્ણ-
ચૂર્ણચુરાદિભ્યો ણિચ્ ।

૩.૧.૨૬ હેતુમતિ ચ ।

૩.૧.૨૭ કણ્ડ્વાદિભ્યો યક્ ।

૩.૧.૨૮ ગુપૂધૂપવિચ્છિપણિપનિભ્ય આયઃ ।

૩.૧.૨૯ ઋતેરીયઙ્ ।

૩.૧.૩૦ કમેર્ણિઙ્ ।

૩.૧.૩૧ આયાદય આર્ધદ્ધાતુકે વા ।

૩.૧.૩૨ સનાદ્યન્તા ધાતવઃ ।

૩.૧.૩૩ સ્યતાસી લૃલુટોઃ ।

૩.૧.૩૪ સિબ્બહુલં લેટિ ।

૩.૧.૩૫ કાસ્પ્રત્યયાદામમન્ત્રે લિટિ ।

૩.૧.૩૬ ઇજાદેશ્ચ ગુરુમતોઽનૃચ્છઃ ।

૩.૧.૩૭ દયાયાસશ્ચ ।

૩.૧.૩૮ ઉષવિદજાગૃભ્યોઽન્યતરસ્યામ્ ।

૩.૧.૩૯ ભીહ્રીભૃહુવાં શ્લુવચ્ચ ।

૩.૧.૪૦ કૃઞ્ ચાનુપ્રયુજ્યતે લિટિ ।

૩.૧.૪૧ વિદાઙ્કુર્વન્ત્વિત્યન્યતરસ્યામ્ ।

૩.૧.૪૨ અભ્યુત્સાદયાંપ્રજનયાંચિકયાંરમયામકઃ
પાવયાંક્રિયાદ્વિદામક્રન્નિતિ ચ્છન્દસિ ।

૩.૧.૪૩ ચ્લિ લુઙિ ।

૩.૧.૪૪ ચ્લેઃ સિચ્ ।

૩.૧.૪૫ શલ ઇગુપધાદનિટઃ ક્સઃ ।

૩.૧.૪૬ શ્લિષ આલિઙ્ગને ।

૩.૧.૪૭ ન દૃશઃ ।

૩.૧.૪૮ ણિશ્રિદ્રુસ્રુભ્યઃ કર્તરિ ચઙ્ ।

૩.૧.૪૯ વિભાષા ધેટ્શ્વ્યોઃ ।

૩.૧.૫૦ ગુપેશ્છન્દસિ ।

૩.૧.૫૧ નોનયતિધ્વનયત્યેલયત્યર્દયતિભ્યઃ ।

૩.૧.૫૨ અસ્યતિવક્તિખ્યાતિભ્યઃ અઙ્ ।

૩.૧.૫૩ લિપિસિચિહ્વશ્ચ ।

૩.૧.૫૪ આત્મનેપદેષ્વન્યતરસ્યામ્ ।

૩.૧.૫૫ પુષાદિદ્યુતાદ્યૢદિતઃ પરસ્મૈપદેષુ ।

૩.૧.૫૬ સર્ત્તિશાસ્ત્યર્તિભ્યશ્ચ ।

૩.૧.૫૭ ઇરિતો વા ।

૩.૧.૫૮ જૄસ્તમ્ભુમ્રુચુમ્લુચુગ્રુચુગ્લુચુગ્લુઞ્ચુશ્વિભ્યશ્ચ ।

૩.૧.૫૯ કૃમૃદૃરુહિભ્યશ્છન્દસિ ।

૩.૧.૬૦ ચિણ્ તે પદઃ ।

૩.૧.૬૧ દીપજનબુધપૂરિતાયિપ્યાયિભ્યોઽન્યતરસ્યામ્ ।

૩.૧.૬૨ અચઃ કર્મકર્તરિ ।

૩.૧.૬૩ દુહશ્ચ ।

૩.૧.૬૪ ન રુધઃ ।

૩.૧.૬૫ તપોઽનુતાપે ચ ।

૩.૧.૬૬ ચિણ્ ભાવકર્મણોઃ ।

૩.૧.૬૭ સાર્વધાતુકે યક્ ।

૩.૧.૬૮ કર્તરિ શપ્ ।

૩.૧.૬૯ દિવાદિભ્યઃ શ્યન્ ।

૩.૧.૭૦ વા ભ્રાશભ્લાશભ્રમુક્રમુક્લમુત્રસિત્રુટિલષઃ ।

૩.૧.૭૧ યસોઽનુપસર્ગાત્ ।

૩.૧.૭૨ સંયસશ્ચ ।

૩.૧.૭૩ સ્વાદિભ્યઃ શ્નુઃ ।

૩.૧.૭૪ શ્રુવઃ શ ૃ ચ ।

૩.૧.૭૫ અક્ષોઽન્યતરસ્યામ્ ।

૩.૧.૭૬ તનૂકરણે તક્ષઃ ।

૩.૧.૭૭ તુદાદિભ્યઃ શઃ ।

૩.૧.૭૮ રુધાદિભ્યઃ શ્નમ્ ।

૩.૧.૭૯ તનાદિકૃઞ્ભ્ય ઉઃ ।

૩.૧.૮૦ ધિન્વિકૃણ્વ્યોર ચ ।

૩.૧.૮૧ ક્ર્યાદિભ્યઃ શ્ના ।

૩.૧.૮૨ સ્તમ્ભુસ્તુમ્ભુસ્કમ્ભુસ્કુમ્ભુસ્કુઞ્ભ્યઃ શ્નુશ્ચ ।

૩.૧.૮૩ હલઃ શ્નઃ શાનજ્ઝૌ ।

૩.૧.૮૪ છન્દસિ શાયજપિ ।

૩.૧.૮૫ વ્યત્યયો બહુલમ્ ।

૩.૧.૮૬ લિઙ્યાશિષ્યઙ્ ।

૩.૧.૮૭ કર્મવત્ કર્મણા તુલ્યક્રિયઃ ।

૩.૧.૮૮ તપસ્તપઃકર્મકસ્યૈવ ।

૩.૧.૮૯ ન દુહસ્નુનમાં યક્ચિણૌ ।

૩.૧.૯૦ કુષિરજોઃ પ્રાચાં શ્યન્ પરસ્મૈપદં ચ ।

૩.૧.૯૧ ધાતોઃ ।

૩.૧.૯૨ તત્રોપપદં સપ્તમીસ્થમ્ ।

૩.૧.૯૩ કૃદતિઙ્ ।

૩.૧.૯૪ વાઽસરૂપોઽસ્ત્રિયામ્ ।

૩.૧.૯૫ કૃત્યાઃ પ્રાઙ્ ણ્વુલઃ ।

૩.૧.૯૬ તવ્યત્તવ્યાનીયરઃ ।

૩.૧.૯૭ અચો યત્ ।

૩.૧.૯૮ પોરદુપધાત્ ।

૩.૧.૯૯ શકિસહોશ્ચ ।

૩.૧.૧૦૦ ગદમદચરયમશ્ચાનુપસર્ગે ।

૩.૧.૧૦૧ અવદ્યપણ્યવર્યા ગર્હ્યપણિતવ્યાનિરોધેષુ ।

૩.૧.૧૦૨ વહ્યં કરણમ્ ।

૩.૧.૧૦૩ અર્યઃ સ્વામિવૈશ્યયોઃ ।

૩.૧.૧૦૪ ઉપસર્યા કાલ્યા પ્રજને ।

૩.૧.૧૦૫ અજર્યં સંગતમ્ ।

૩.૧.૧૦૬ વદઃ સુપિ ક્યપ્ ચ ।

૩.૧.૧૦૭ ભુવો ભાવે ।

૩.૧.૧૦૮ હનસ્ત ચ ।

૩.૧.૧૦૯ એતિસ્તુશાસ્વૃદૃજુષઃ ક્યપ્ ।

૩.૧.૧૧૦ ઋદુપધાચ્ચાક્લૃપિચૃતેઃ ।

૩.૧.૧૧૧ ઈ ચ ખનઃ ।

૩.૧.૧૧૨ ભૃઞોઽસંજ્ઞાયામ્ ।

૩.૧.૧૧૩ મૃજેર્વિભાષા ।

૩.૧.૧૧૪ રાજસૂયસૂર્યમૃષોદ્યરુચ્યકુપ્યકૃષ્ટપચ્યાવ્યથ્યાઃ
।

૩.૧.૧૧૫ ભિદ્યોદ્ધ્યૌ નદે ।

૩.૧.૧૧૬ પુષ્યસિદ્ધ્યૌ નક્ષત્રે ।

૩.૧.૧૧૭ વિપૂયવિનીયજિત્યા મુઞ્જકલ્કહલિષુ ।

૩.૧.૧૧૮ પ્રત્યપિભ્યાં ગ્રહેશ્છન્દસિ ।

૩.૧.૧૧૯ પદાસ્વૈરિબાહ્યાપક્ષ્યેષુ ચ ।

૩.૧.૧૨૦ વિભાષા કૃવૃષોઃ ।

૩.૧.૧૨૧ યુગ્યં ચ પત્રે ।

૩.૧.૧૨૨ અમાવસ્યદન્યતરસ્યામ્ ।

૩.૧.૧૨૩ છન્દસિ નિષ્ટર્ક્યદેવહૂયપ્રણીયોન્નીયોચ્છિષ્ય
મર્યસ્તર્યાધ્વર્યખન્યખાન્યદેવયજ્યાઽઽપૃચ્છ્ય
પ્રતિષીવ્યબ્રહ્મવાદ્યભાવ્યસ્તાવ્યોપચાય્યપૃડાનિ ।

૩.૧.૧૨૪ ઋહલોર્ણ્યત્ ।

૩.૧.૧૨૫ ઓરાવશ્યકે ।

૩.૧.૧૨૬ આસુયુવપિરપિલપિત્રપિચમશ્ચ ।

૩.૧.૧૨૭ આનાય્યોઽનિત્યે ।

૩.૧.૧૨૮ પ્રણાય્યોઽસંમતૌ ।

૩.૧.૧૨૯ પાય્યસાન્નાય્યનિકાય્યધાય્યા માનહવિર્નિવાસસામિધેનીષુ ।

૩.૧.૧૩૦ ક્રતૌ કુણ્ડપાય્યસંચાય્યૌ ।

૩.૧.૧૩૧ અગ્નૌ પરિચાય્યોપચાય્યસમૂહ્યાઃ ।

૩.૧.૧૩૨ ચિત્યાગ્નિચિત્યે ચ ।

૩.૧.૧૩૩ ણ્વુલ્તૃચૌ ।

૩.૧.૧૩૪ નન્દિગ્રહિપચાદિભ્યો લ્યુણિન્યચઃ ।

૩.૧.૧૩૫ ઇગુપધજ્ઞાપ્રીકિરઃ કઃ ।

૩.૧.૧૩૬ આતશ્ચોપસર્ગે ।

૩.૧.૧૩૭ પાઘ્રાધ્માધેટ્દૃશઃ શઃ ।

૩.૧.૧૩૮ અનુપસર્ગાલ્લિમ્પવિન્દધારિપારિવેદ્યુદેજિચેતિ-
સાતિસાહિભ્યશ્ચ ।

૩.૧.૧૩૯ દદાતિદધાત્યોર્વિભાષા ।

૩.૧.૧૪૦ જ્વલિતિકસન્તેભ્યો ણઃ ।

૩.૧.૧૪૧ શ્યાઽઽદ્વ્યધાસ્રુસંસ્વતીણવસાઽવહૃલિહ-
શ્લિષશ્વસશ્ચ ।

૩.૧.૧૪૨ દુન્યોરનુપસર્ગે ।

૩.૧.૧૪૩ વિભાષા ગ્રહેઃ ।

૩.૧.૧૪૪ ગેહે કઃ ।

૩.૧.૧૪૫ શિલ્પિનિ ષ્વુન્ ।
૩.૧.૧૪૬ ગસ્થકન્ ।
૩.૧.૧૪૭ ણ્યુટ્ ચ ।
૩.૧.૧૪૮ હશ્ચ વ્રીહિકાલયોઃ ।
૩.૧.૧૪૯ પ્રુસૃલ્વઃ સમભિહારે વુન્ ।
૩.૧.૧૫૦ આશિષિ ચ ।
૩.૨.૧ કર્મણ્યણ્ ।
૩.૨.૨ હ્વાવામશ્ચ ।
૩.૨.૩ આતોઽનુપસર્ગે કઃ ।
૩.૨.૪ સુપિ સ્થઃ ।
૩.૨.૫ તુન્દશોકયોઃ પરિમૃજાપનુદોઃ ।
૩.૨.૬ પ્રે દાજ્ઞઃ ।
૩.૨.૭ સમિ ખ્યઃ ।
૩.૨.૮ ગાપોષ્ટક્ ।
૩.૨.૯ હરતેરનુદ્યમનેઽચ્ ।
૩.૨.૧૦ વયસિ ચ ।
૩.૨.૧૧ આઙિ તાચ્છીલ્યે ।
૩.૨.૧૨ અર્હઃ ।
૩.૨.૧૩ સ્તમ્બકર્ણયોઃ રમિજપોઃ ।
૩.૨.૧૪ શમિ ધાતોઃ સંજ્ઞાયામ્ ।
૩.૨.૧૫ અધિકરણે શેતેઃ ।
૩.૨.૧૬ ચરેષ્ટઃ ।
૩.૨.૧૭ ભિક્ષાસેનાઽઽદાયેષુ ચ ।
૩.૨.૧૮ પુરોઽગ્રતોઽગ્રેષુ સર્તેઃ ।
૩.૨.૧૯ પૂર્વે કર્તરિ ।
૩.૨.૨૦ કૃઞો હેતુતાચ્છીલ્યાનુલોમ્યેષુ ।
૩.૨.૨૧ દિવાવિભાનિશાપ્રભાભાસ્કરાન્તાનન્તાદિબહુનાન્દી- કિમ્લિપિ
લિબિબલિભક્તિકર્તૃચિત્રક્ષેત્ર-
સંખ્યાજઙ્ઘાબાહ્વહર્યત્તત્ધનુરરુષ્ષુ ।
૩.૨.૨૨ કર્મણિ ભૃતૌ ।
૩.૨.૨૩ ન શબ્દશ્લોકકલહગાથાવૈરચાટુસૂત્રમન્ત્રપદેષુ ।
૩.૨.૨૪ સ્તમ્બશકૃતોરિન્ ।

૩.૨.૨૫ હરતેર્દૃતિનાથયોઃ પશૌ ।

૩.૨.૨૬ ફલેગ્રહિરાત્મમ્ભરિશ્ચ ।

૩.૨.૨૭ છન્દસિ વનસનરક્ષિમથામ્ ।

૩.૨.૨૮ એજેઃ ખશ્ ।

૩.૨.૨૯ નાસિકાસ્તનયોર્ધ્માધેટોઃ ।

૩.૨.૩૦ નાડીમુષ્ટ્યોશ્ચ ।

૩.૨.૩૧ ઉદિ કૂલે રુજિવહોઃ ।

૩.૨.૩૨ વહાભ્રે લિહઃ ।

૩.૨.૩૩ પરિમાણે પચઃ ।

૩.૨.૩૪ મિતનખે ચ ।

૩.૨.૩૫ વિધ્વરુષોઃ તુદઃ ।

૩.૨.૩૬ અસૂર્યલલાટયોર્દૃશિતપોઃ ।

૩.૨.૩૭ ઉગ્રમ્પશ્યેરમ્મદપાણિન્ધમાશ્ચ ।

૩.૨.૩૮ પ્રિયવશે વદઃ ખચ્ ।

૩.૨.૩૯ દ્વિષત્પરયોસ્તાપેઃ ।

૩.૨.૪૦ વાચિ યમો વ્રતે ।

૩.૨.૪૧ પૂઃસર્વયોર્દારિસહોઃ ।

૩.૨.૪૨ સર્વકૂલાભ્રકરીષેષુ કષઃ ।

૩.૨.૪૩ મેઘર્તિભયેષુ કૃઞઃ ।

૩.૨.૪૪ ક્ષેમપ્રિયમદ્રેઽણ્ ચ ।

૩.૨.૪૫ આશિતે ભુવઃ કરણભાવયોઃ ।

૩.૨.૪૬ સંજ્ઞાયાં ભૃતૃવૃજિધારિસહિતપિદમઃ ।

૩.૨.૪૭ ગમશ્ચ ।

૩.૨.૪૮ અન્તાત્યન્તાધ્વદૂરપારસર્વાનન્તેષુ ડઃ ।

૩.૨.૪૯ આશિષિ હનઃ ।

૩.૨.૫૦ અપે ક્લેશતમસોઃ ।

૩.૨.૫૧ કુમારશીર્ષયોર્ણિનિઃ ।

૩.૨.૫૨ લક્ષણે જાયાપત્યોષ્ટક્ ।

૩.૨.૫૩ અમનુષ્યકર્તૃકે ચ ।

૩.૨.૫૪ શક્તૌ હસ્તિકપાટયોઃ ।

૩.૨.૫૫ પાણિઘતાડઘૌ શિલ્પિનિ ।

૩.૨.૫૬ આઢ્યસુભગસ્થૂલપલિતનગ્નાન્ધપ્રિયેષુ

 વ્રશ્ચેષ્વચ્વૌ કૃઞઃ કરણે ખ્યુન્ ।

૩.૨.૫૭ કર્તરિ ભુવઃ ખિષ્ણુચ્ખુકઞૌ ।

૩.૨.૫૮ સ્પૃશોઽનુદકે ક્વિન્ ।

૩.૨.૫૯ ઋત્વિગ્દધૃક્સ્રગ્દિગુષ્ણિગઞ્ચુયુજિક્રુઞ્ચાં ચ ।

૩.૨.૬૦ ત્યદાદિષુ દૃશોઽનાલોચને કઞ્ ચ ।

૩.૨.૬૧

સત્સૂદ્વિષદ્રુહદુહયુજવિદભિદચ્છિદ-જિનીરાજામુપસર્ગેઽપિ

ક્વિપ્ ।

૩.૨.૬૨ ભજો ણ્વિઃ ।

૩.૨.૬૩ છન્દસિ સહઃ ।

૩.૨.૬૪ વહશ્ચ ।

૩.૨.૬૫ કવ્યપુરીષપુરીષ્યેષુ ઞ્યુટ્ ।

૩.૨.૬૬ હવ્યેઽનન્તઃ પાદમ્ ।

૩.૨.૬૭ જનસનખનક્રમગમો વિટ્ ।

૩.૨.૬૮ અદોઽનન્ને ।

૩.૨.૬૯ ક્રવ્યે ચ ।

૩.૨.૭૦ દુહઃ કબ્ ઘશ્ચ ।

૩.૨.૭૧ મન્ત્રે શ્વેતવહૌક્થશસ્પુરોડાશો ણ્વિન્ ।

૩.૨.૭૨ અવે યજઃ ।

૩.૨.૭૩ વિજુપે છન્દસિ ।

૩.૨.૭૪ આતો મનિન્ક્વનિપ્વનિપશ્ચ ।

૩.૨.૭૫ અન્યેભ્યોઽપિ દૃશ્યન્તે ।

૩.૨.૭૬ ક્વિપ્ ચ ।

૩.૨.૭૭ સ્થઃ ક ચ ।

૩.૨.૭૮ સુપ્યજાતૌ ણિનિસ્તાચ્છિલ્યે ।

૩.૨.૭૯ કર્તર્યુપમાને ।

૩.૨.૮૦ વ્રતે ।

૩.૨.૮૧ બહુલમાભીક્ષ્ણ્યે ।

૩.૨.૮૨ મનઃ ।

૩.૨.૮૩ આત્મમાને ખશ્ચ ।

૩.૨.૮૪ ભૂતે ।

૩.૨.૮૫ કરણે યજઃ ।

૩.૨.૮૬ કર્મણિ હનઃ ।

૩.૨.૮૭ બ્રહ્મભ્રૂણવૃત્રેષુ ક્વિપ્ ।

૩.૨.૮૮ બહુલં છન્દસિ ।

૩.૨.૮૯ સુકર્મપાપમન્ત્રપુણ્યેષુ કૃઞઃ ।

૩.૨.૯૦ સોમે સુઞઃ ।

૩.૨.૯૧ અગ્નૌ ચેઃ ।

૩.૨.૯૨ કર્મણ્યગ્ન્યાખ્યાયામ્ ।

૩.૨.૯૩ કર્મણીનિર્વિક્રિયઃ ।

૩.૨.૯૪ દૃશેઃ ક્વનિપ્ ।

૩.૨.૯૫ રાજનિ યુધિકૃઞઃ ।

૩.૨.૯૬ સહે ચ ।

૩.૨.૯૭ સપ્તમ્યાં જનેર્ડઃ ।

૩.૨.૯૮ પઞ્ચમ્યામજાતૌ ।

૩.૨.૯૯ ઉપસર્ગે ચ સંજ્ઞાયામ્ ।

૩.૨.૧૦૦ અનૌ કર્મણિ ।

૩.૨.૧૦૧ અન્યેષ્વપિ દૃશ્યતે ।

૩.૨.૧૦૨ નિષ્ઠા ।

૩.૨.૧૦૩ સુયજોર્ઙ્વનિપ્ ।

૩.૨.૧૦૪ જીર્યતેરતૃન્ ।

૩.૨.૧૦૫ છન્દસિ લિટ્ ।

૩.૨.૧૦૬ લિટઃ કાનજ્વા ।

૩.૨.૧૦૭ ક્વસુશ્ચ ।

૩.૨.૧૦૮ ભાષાયાં સદવસશ્રુવઃ ।

૩.૨.૧૦૯ ઉપેયિવાનનાશ્વાનનૂચાનશ્ચ ।

૩.૨.૧૧૦ લુઙ્ ।

૩.૨.૧૧૧ અનદ્યતને લઙ્ ।

૩.૨.૧૧૨ અભિજ્ઞાવચને લૃટ્ ।

૩.૨.૧૧૩ ન યદિ ।

૩.૨.૧૧૪ વિભાષા સાકાઙ્ક્ષે ।

૩.૨.૧૧૫ પરોક્ષે લિટ્ ।

૩.૨.૧૧૬ હશશ્વતોર્લઙ્ ચ ।

૩.૨.૧૧૭ પ્રશ્ને ચાસન્નકાલે ।

૩.૨.૧૧૮ લટ્ સ્મે ।

૩.૨.૧૧૯ અપરોક્ષે ચ ।

૩.૨.૧૨૦ નનૌ પૃષ્ટપ્રતિવચને ।

૩.૨.૧૨૧ નન્વોર્વિભાષા ।

૩.૨.૧૨૨ પુરિ લુઙ્ ચાસ્મે ।

૩.૨.૧૨૩ વર્તમાને લટ્ ।

૩.૨.૧૨૪ લટઃ શતૃશાનચાવપ્રથમાસમાનાધિકરણે ।

૩.૨.૧૨૫ સમ્બોધને ચ ।

૩.૨.૧૨૬ લક્ષણહેત્વોઃ ક્રિયાયાઃ ।

૩.૨.૧૨૭ તૌ સત્ ।

૩.૨.૧૨૮ પૂઙ્યજોઃ શાનન્ ।

૩.૨.૧૨૯ તાચ્છીલ્યવયોવચનશક્તિષુ ચાનશ્ ।

૩.૨.૧૩૦ ઇઙ્ધાર્યોઃ શત્રકૃચ્છ્રિણિ ।

૩.૨.૧૩૧ દ્વિષોઽમિત્રે ।

૩.૨.૧૩૨ સુઞો યજ્ઞસંયોગે ।

૩.૨.૧૩૩ અર્હઃ પૂજાયામ્ ।

૩.૨.૧૩૪ આક્વેસ્તચ્છીલતદ્ધર્મતત્સાધુકારિષુ ।

૩.૨.૧૩૫ તૃન્ ।

૩.૨.૧૩૬ અલંકૃઞ્નિરાકૃઞ્પ્રજનોત્પચોત્પતોન્મદ-
રુચ્યપત્રપવૃતુવૃધુસહચર ઇષ્ણુચ્ ।

૩.૨.૧૩૭ ણેશ્છન્દસિ ।

૩.૨.૧૩૮ ભુવશ્ચ ।

૩.૨.૧૩૯ ગ્લાજિસ્થશ્ચ ક્સ્નુઃ ।

૩.૨.૧૪૦ ત્રસિગૃધિધૃષિક્ષિપેઃ ક્નુઃ ।

૩.૨.૧૪૧ શમિત્યષ્ટાભ્યો ઘિનુણ્ ।

૩.૨.૧૪૨ સમ્પૃચાનુરુધાઙ્યમાઙ્યસપરિસૃસંસૃજ-
પરિદેવિસંજ્વરપરિક્ષિપપરિરટપરિવદપરિદહપરિમુહ-
દુષદ્વિષદ્રુહદુહયુજાક્રીડવિવિચત્યજરજ-
ભજાતિચરાપચરામુષાભ્યાહનશ્ચ ।

૩.૨.૧૪૩ વૌ કષલસકત્થસ્રમ્ભઃ ।

૩.૨.૧૪૪ અપે ચ લષઃ ।

૩.૨.૧૪૫ પ્રે લપસૃદ્રુમથવદવસઃ ।

૩.૨.૧૪૬ નિન્દહિંસક્લિશખાદવિનાશપરિક્ષિપપરિરટપરિવાદિ-
વ્યાભાષાસૂયો વુઞ્ ।
૩.૨.૧૪૭ દેવિક્રુશોશ્ચોપસર્ગે ।
૩.૨.૧૪૮ ચલનશબ્દાર્થાદકર્મકાદ્યુચ્ ।
૩.૨.૧૪૯ અનુદાત્તેતશ્ચ હલાદેઃ ।
૩.૨.૧૫૦ જુચઙ્ક્રમ્યદન્દ્રમ્યસૃગૃધિજ્વલશુચલષપતપદઃ
।
૩.૨.૧૫૧ ક્રુધમણ્ડાર્થેભ્યશ્ચ ।
૩.૨.૧૫૨ ન યઃ ।
૩.૨.૧૫૩ સૂદદીપદીક્ષશ્ચ ।
૩.૨.૧૫૪ લષપતપદસ્થાભૂવૃષહનકમગમશૄભ્ય ઉકઞ્ ।
૩.૨.૧૫૫ જલ્પભિક્ષકુટ્ટલુણ્ટવૃઙઃ ષાકન્ ।
૩.૨.૧૫૬ પ્રજોરિનિઃ ।
૩.૨.૧૫૭ જિદૃક્ષિવિશ્રીણ્વમાવ્યથાભ્યમપરિભૂપ્રસૂભ્યશ્ચ ।
૩.૨.૧૫૮ સ્પૃહિગૃહિપતિદયિનિદ્રાતન્દ્રાશ્રદ્ધાભ્ય આલુચ્ ।
૩.૨.૧૫૯ દાધેટ્સિશદસદો રુઃ ।
૩.૨.૧૬૦ સૃઘસ્યદઃ ક્મરચ્ ।
૩.૨.૧૬૧ ભઞ્જભાસમિદો ઘુરચ્ ।
૩.૨.૧૬૨ વિદિભિદિચ્છિદેઃ કુરચ્ ।
૩.૨.૧૬૩ ઇણ્નશ્જિસર્તિભ્યઃ ક્વરપ્ ।
૩.૨.૧૬૪ ગત્વરશ્ચ ।
૩.૨.૧૬૫ જાગુરૂકઃ ।
૩.૨.૧૬૬ યજજપદશાં યઙઃ ।
૩.૨.૧૬૭ નમિકમ્પિસ્મ્યજસકમહિંસદીપો રઃ ।
૩.૨.૧૬૮ સનાશંસભિક્ષ ઉઃ ।
૩.૨.૧૬૯ વિન્દુરિચ્છુઃ ।
૩.૨.૧૭૦ ક્યાચ્છન્દસિ ।
૩.૨.૧૭૧ આદૃગમહનજનઃ કિકિનૌ લિટ્ ચ ।
૩.૨.૧૭૨ સ્વપિતૃષોર્નજિઙ્ ।
૩.૨.૧૭૩ શૄવન્દ્યોરારુઃ ।
૩.૨.૧૭૪ ભિયઃ ક્રુક્લુકનૌ ।
૩.૨.૧૭૫ સ્થેશભાસપિસકસો વરચ્ ।

૩.૨.૧૭૬ યશ્ચ યઙઃ ।

૩.૨.૧૭૭ ભ્રાજભાસધુર્વિદ્યુતોર્જિપૃજુગ્રાવસ્તુવઃ ક્વિપ્ ।

૩.૨.૧૭૮ અન્યેભ્યોઽપિ દૃશ્યતે ।

૩.૨.૧૭૯ ભુવઃ સંજ્ઞાઽન્તરયોઃ ।

૩.૨.૧૮૦ વિપ્રસમ્ભ્યો ડ્વસંજ્ઞાયામ્ ।

૩.૨.૧૮૧ ધઃ કર્મણિ ષ્ટ્રન્ ।

૩.૨.૧૮૨ દામ્નીશસયુયુજસ્તુતુદસિસિચમિહપતદશનહઃ કરણે ।

૩.૨.૧૮૩ હલસૂકરયોઃ પુવઃ ।

૩.૨.૧૮૪ અર્તિલૂધૂસૂખનસહચર ઇત્રઃ ।

૩.૨.૧૮૫ પુવઃ સંજ્ઞાયામ્ ।

૩.૨.૧૮૬ કર્તરિ ચર્ષિદેવતયોઃ ।

૩.૨.૧૮૭ ઞીતઃ ક્તઃ ।

૩.૨.૧૮૮ મતિબુદ્ધિપૂજાર્થેભ્યશ્ચ ।

૩.૩.૧ ઉણાદયો બહુલમ્ ।

૩.૩.૨ ભૂતેઽપિ દૃશ્યન્તે ।

૩.૩.૩ ભવિષ્યતિ ગમ્યાદયઃ ।

૩.૩.૪ યાવત્પુરાનિપાતયોર્લટ્ ।

૩.૩.૫ વિભાષા કદાકર્હ્યોઃ ।

૩.૩.૬ કિંવૃત્તે લિપ્સાયામ્ ।

૩.૩.૭ લિપ્સ્યમાનસિદ્ધૌ ચ ।

૩.૩.૮ લોડર્થલક્ષણે ચ ।

૩.૩.૯ લિઙ્ ચોર્ધ્વમૌહૂર્તિકે ।

૩.૩.૧૦ તુમુન્ણ્વુલૌ ક્રિયાયાં ક્રિયાર્થાયામ્ ।

૩.૩.૧૧ ભાવવચનાશ્ચ ।

૩.૩.૧૨ અણ્ કર્મણિ ચ ।

૩.૩.૧૩ લૃટ્ શેષે ચ ।

૩.૩.૧૪ લૃટઃ સદ્ વા ।

૩.૩.૧૫ અનદ્યતને લુટ્ ।

૩.૩.૧૬ પદરુજવિશસ્પૃશો ઘઞ્ ।

૩.૩.૧૭ સૃ સ્થિરે ।

૩.૩.૧૮ ભાવે ।

૩.૩.૧૯ અકર્તરિ ચ કારકે સંજ્ઞાયામ્ ।

૩.૩.૨૦ પરિમણાખ્યાયાં સર્વેભ્યઃ ।

૩.૩.૨૧ ઇઙશ્ચ ।

૩.૩.૨૨ ઉપસર્ગે રુવઃ ।

૩.૩.૨૩ સમિ યુદ્રુદુવઃ ।

૩.૩.૨૪ શ્રિણીભુવોઽનુપસર્ગે ।

૩.૩.૨૫ વૌ ક્ષુશ્રુવઃ ।

૩.૩.૨૬ અવોદોર્નિયઃ ।

૩.૩.૨૭ પ્રે દ્રુસ્તુસ્રુવઃ ।

૩.૩.૨૮ નિરભ્યોઃ પૂલ્વોઃ ।

૩.૩.૨૯ ઉન્ન્યોર્ગ્રઃ ।

૩.૩.૩૦ કૃ ધાન્યે ।

૩.૩.૩૧ યજ્ઞે સમિ સ્તુવઃ ।

૩.૩.૩૨ પ્રે સ્ત્રોઽયજ્ઞે ।

૩.૩.૩૩ પ્રથને વાવશબ્દે ।

૩.૩.૩૪ છન્દોનામ્નિ ચ ।

૩.૩.૩૫ ઉદિ ગ્રહઃ ।

૩.૩.૩૬ સમિ મુષ્ટૌ ।

૩.૩.૩૭ પરિન્યોર્નીણોર્દ્યૂતાભ્રેષયોઃ ।

૩.૩.૩૮ પરાવનુપાત્યય ઇણઃ ।

૩.૩.૩૯ વ્યુપયોઃ શેતેઃ પર્યાયે ।

૩.૩.૪૦ હસ્તાદાને ચેરસ્તેયે ।

૩.૩.૪૧ નિવાસચિતિશરીરોપસમાધાનેષ્વાદેશ્ચ કઃ ।

૩.૩.૪૨ સંઘે ચાનૌત્તરાધર્યે ।

૩.૩.૪૩ કર્મવ્યતિહારે ણચ્ સ્ત્રિયામ્ ।

૩.૩.૪૪ અભિવિધૌ ભાવ ઇનુણ્ ।

૩.૩.૪૫ આક્રોશેઽવન્યોર્ગ્રહઃ ।

૩.૩.૪૬ પ્રે લિપ્સાયામ્ ।

૩.૩.૪૭ પરૌ યજ્ઞે ।

૩.૩.૪૮ નૌ વૃ ધાન્યે ।

૩.૩.૪૯ ઉદિ શ્રયતિયૌતિપૂદ્રુવઃ ।

૩.૩.૫૦ વિભાષાઽઽઙિ રુપ્લુવોઃ ।

૩.૩.૫૧ અવે ગ્રહો વર્ષપ્રતિબન્ધે ।

૩.૩.૫૨ પ્રે વણિજામ્ ।

૩.૩.૫૩ રશ્મૌ ચ ।

૩.૩.૫૪ વૃણોતેરાચ્છાદને ।

૩.૩.૫૫ પરૌ ભુવોઽવજ્ઞાને ।

૩.૩.૫૬ એરચ્ ।

૩.૩.૫૭ ઋદોરપ્ ।

૩.૩.૫૮ ગ્રહવૃદૃનિશ્ચિગમશ્ચ ।

૩.૩.૫૯ ઉપસર્ગેઽદઃ ।

૩.૩.૬૦ નૌ ણ ચ ।

૩.૩.૬૧ વ્યધજપોરનુપસર્ગે ।

૩.૩.૬૨ સ્વનહસોર્વા ।

૩.૩.૬૩ યમઃ સમુપનિવિષુ ।

૩.૩.૬૪ નૌ ગદનદપઠસ્વનઃ ।

૩.૩.૬૫ ક્વણો વીણાયાં ચ ।

૩.૩.૬૬ નિત્યં પણઃ પરિમાણે ।

૩.૩.૬૭ મદોઽનુપસર્ગે ।

૩.૩.૬૮ પ્રમદસમ્મદૌ હર્ષે ।

૩.૩.૬૯ સમુદોરજઃ પશુષુ ।

૩.૩.૭૦ અક્ષેષુ ગ્લહઃ ।

૩.૩.૭૧ પ્રજને સર્તેઃ ।

૩.૩.૭૨ હ્વઃ સમ્પ્રસારણં ચ ન્યભ્યુપવિષુ ।

૩.૩.૭૩ આઙિ યુદ્ધે ।

૩.૩.૭૪ નિપાનમાહાવઃ ।

૩.૩.૭૫ ભાવેઽનુપસર્ગસ્ય ।

૩.૩.૭૬ હનશ્ચ વધઃ ।

૩.૩.૭૭ મૂર્તૌ ઘનઃ ।

૩.૩.૭૮ અન્તર્ઘનો દેશે ।

૩.૩.૭૯ અગારૈકદેશે પ્રઘણઃ પ્રઘાણશ્ચ ।

૩.૩.૮૦ ઉદ્ઘનોઽત્યાધાનમ્ ।

૩.૩.૮૧ અપઘનોઽઙ્ગમ્ ।

૩.૩.૮૨ કરણેઽયોવિદ્રુષુ ।

૩.૩.૮૩ સ્તમ્બે ક ચ ।

૩.૩.૮૪ પરૌ ઘઃ ।

૩.૩.૮૫ ઉપઘ્ન આશ્રયે ।

૩.૩.૮૬ સંઘોદ્ઘૌ ગણપ્રશંસયોઃ ।

૩.૩.૮૭ નિઘો નિમિતમ્ ।

૩.૩.૮૮ ડ્વિતઃ ક્ત્રિઃ ।

૩.૩.૮૯ ટ્વિતોઽથુચ્ ।

૩.૩.૯૦ યજયાચયતવિચ્છપ્રચ્છરક્ષો નઙ્ ।

૩.૩.૯૧ સ્વપો નન્ ।

૩.૩.૯૨ ઉપસર્ગે ઘોઃ કિઃ ।

૩.૩.૯૩ કર્મણ્યધિકરણે ચ ।

૩.૩.૯૪ સ્ત્રિયાં ક્તિન્ ।

૩.૩.૯૫ સ્થાગાપાપચાં ભાવે ।

૩.૩.૯૬ મન્ત્રે વૃષેષપચમનવિદભૂવીરા ઉદાત્તઃ ।

૩.૩.૯૭ ઊતિયૂતિજૂતિસાતિહેતિકીર્તયશ્ચ ।

૩.૩.૯૮ વ્રજયજોર્ભાવે ક્યપ્ ।

૩.૩.૯૯ સંજ્ઞાયાં સમજનિષદનિપતમનવિદષુઞ્શીઙ્ભૃઞિણઃ
।

૩.૩.૧૦૦ કૃઞઃ શ ચ ।

૩.૩.૧૦૧ ઇચ્છા ।

૩.૩.૧૦૨ અ પ્રત્યયાત્ ।

૩.૩.૧૦૩ ગુરોશ્ચ હલઃ ।

૩.૩.૧૦૪ ષિદ્ભિદાદિભ્યોઽઙ્ ।

૩.૩.૧૦૫ ચિન્તિપૂજિકથિકુમ્બિચર્ચશ્ચ ।

૩.૩.૧૦૬ આતશ્ચોપસર્ગે ।

૩.૩.૧૦૭ ણ્યાસશ્રન્થો યુચ્ ।

૩.૩.૧૦૮ રોગાખ્યાયાં ણ્વુલ્ બહુલમ્ ।

૩.૩.૧૦૯ સંજ્ઞાયામ્ ।

૩.૩.૧૧૦ વિભાષાઽઽખ્યાનપરિપ્રશ્નયોરિઞ્ ચ ।

૩.૩.૧૧૧ પર્યાયાર્હર્ણોત્પત્તિષુ ણ્વુચ્ ।

૩.૩.૧૧૨ આક્રોશે નઞ્યનિઃ ।

૩.૩.૧૧૩ કૃત્યલ્યુટો બહુલમ્ ।

૩.૩.૧૧૪ નપુંસકે ભાવે ક્તઃ ।

૩.૩.૧૧૫ લ્યુટ્ ચ ।

૩.૩.૧૧૬ કર્મણિ ચ યેન સંસ્પર્શાત્ કર્તુઃ શરીરસુખમ્ ।

૩.૩.૧૧૭ કરણાધિકરણયોશ્ચ ।

૩.૩.૧૧૮ પુંસિ સંજ્ઞાયાં ઘઃ પ્રાયેણ ।

૩.૩.૧૧૯ ગોચરસંચરવહવ્રજવ્યજાપણનિગમાશ્ચ ।

૩.૩.૧૨૦ અવે તૃસ્ત્રોર્ઘઞ્ ।

૩.૩.૧૨૧ હલશ્ચ ।

૩.૩.૧૨૨ અધ્યાયન્યાયોદ્યાવસંહારાધારાવયાશ્ચ ।

૩.૩.૧૨૩ ઉદઙ્કોઽનુદકે ।

૩.૩.૧૨૪ જાલમાનાયઃ ।

૩.૩.૧૨૫ ખનો ઘ ચ ।

૩.૩.૧૨૬ ઈષદ્દુઃસુષુ કૃચ્છ્રાકૃચ્છ્રાર્થેષુ ખલ્ ।

૩.૩.૧૨૭ કર્તૃકર્મણોશ્ચ ભૂકૃઞોઃ ।

૩.૩.૧૨૮ આતો યુચ્ ।

૩.૩.૧૨૯ છન્દસિ ગત્યર્થેભ્યઃ ।

૩.૩.૧૩૦ અન્યેભ્યોઽપિ દૃશ્યતે ।

૩.૩.૧૩૧ વર્તમાનસામીપ્યે વર્તમાનવદ્વા ।

૩.૩.૧૩૨ આશંસાયાં ભૂતવચ્ચ ।

૩.૩.૧૩૩ ક્ષિપ્રવચને લૃટ્ ।

૩.૩.૧૩૪ આશંસાવચને લિઙ્ ।

૩.૩.૧૩૫ નાનદ્યતનવત્ ક્રિયાપ્રબન્ધસામીપ્યયોઃ ।

૩.૩.૧૩૬ ભવિષ્યતિ મર્યાદાવચનેઽવરસ્મિન્ ।

૩.૩.૧૩૭ કાલવિભાગે ચાનહોરાત્રાણામ્ ।

૩.૩.૧૩૮ પરસ્મિન્ વિભાષા ।

૩.૩.૧૩૯ લિઙ્નિમિત્તે લૃઙ્ ક્રિયાઽતિપત્તૌ ।

૩.૩.૧૪૦ ભૂતે ચ ।

૩.૩.૧૪૧ વોતાપ્યોઃ ।

૩.૩.૧૪૨ ગર્હાયાં લડપિજાત્વોઃ ।

૩.૩.૧૪૩ વિભાષા કથમિ લિઙ્ ચ ।

૩.૩.૧૪૪ કિંવૃત્તે લિઙ્લૃટૌ ।

૩.૩.૧૪૫ અનવક્લૃપ્ત્યમર્ષયોરકિંવૃત્તે અપિ ।

૩.૩.૧૪૬ કિંકિલાસ્ત્યર્થેષુ લૃટ્ ।

૩.૩.૧૪૭ જાતુયદોર્લિઙ્ ।

૩.૩.૧૪૮ યચ્ચયત્રયોઃ ।

૩.૩.૧૪૯ ગર્હાયાં ચ ।

૩.૩.૧૫૦ ચિત્રીકરણે ચ ।

૩.૩.૧૫૧ શેષે લૃડયદૌ ।

૩.૩.૧૫૨ ઉતાપ્યોઃ સમર્થયોર્લિઙ્ ।

૩.૩.૧૫૩ કામપ્રવેદનેઽકચ્ચિતિ ।

૩.૩.૧૫૪ સમ્ભવાનેઽલમિતિ ચેત્ સિદ્ધાપ્રયોગે ।

૩.૩.૧૫૫ વિભાષા ધાતૌ સમ્ભાવનવચનેઽયદિ ।

૩.૩.૧૫૬ હેતુહેતુમતોર્લિઙ્ ।

૩.૩.૧૫૭ ઇચ્છાર્થેષુ લિઙ્લોટૌ ।

૩.૩.૧૫૮ સમાનકર્તૃકેષુ તુમુન્ ।

૩.૩.૧૫૯ લિઙ્ ચ ।

૩.૩.૧૬૦ ઇચ્છાર્થેભ્યો વિભાષા વર્તમાને ।

૩.૩.૧૬૧ વિધિનિમન્ત્રણામન્ત્રણ અધીષ્ટસમ્પ્રશ્નપ્રાર્થનેષુ
લિઙ્ ।

૩.૩.૧૬૨ લોટ્ ચ ।

૩.૩.૧૬૩ પ્રૈષાતિસર્ગપ્રાપ્તકાલેષુ કૃત્યાશ્ચ ।

૩.૩.૧૬૪ લિઙ્ ચોર્ધ્વમૌહૂર્તિકે ।

૩.૩.૧૬૫ સ્મે લોટ્ ।

૩.૩.૧૬૬ અધીષ્ટે ચ ।

૩.૩.૧૬૭ કાલસમયવેલાસુ તુમુન્ ।

૩.૩.૧૬૮ લિઙ્ યદિ ।

૩.૩.૧૬૯ અર્હે કૃત્યતૃચશ્ચ ।

૩.૩.૧૭૦ આવશ્યકાધમર્ણ્યયોર્ણિનિઃ ।

૩.૩.૧૭૧ કૃત્યાશ્ચ ।

૩.૩.૧૭૨ શકિ લિઙ્ ચ ।

૩.૩.૧૭૩ આશિષિ લિઙ્લોટૌ ।

૩.૩.૧૭૪ ક્તિચ્ક્તૌ ચ સંજ્ઞાયામ્ ।

૩.૩.૧૭૫ માઙિ લુઙ્ ।

૩.૩.૧૭૬ સ્મોત્તરે લઙ્ ચ ।

૩.૪.૧ ધાતુસમ્બન્ધે પ્રત્યયાઃ ।

૩.૪.૨ ક્રિયાસમભિહારે લોટ્, લોટો હિસ્વૌ, વા ચ તધ્વમોઃ ।
૩.૪.૩ સમુચ્ચયેઽન્યતરસ્યામ્ ।
૩.૪.૪ યથાવિધ્યનુપ્રયોગઃ પૂર્વસ્મિન્ ।
૩.૪.૫ સમુચ્ચયે સામાન્યવચનસ્ય ।
૩.૪.૬ છન્દસિ લુઙ્લઙ્લિટઃ ।
૩.૪.૭ લિઙર્થે લેટ્ ।
૩.૪.૮ ઉપસંવાદાશઙ્કયોશ્ચ ।
૩.૪.૯ તુમર્થે સેસેનસેઅસેન્ક્સેકસેનધ્યૈઅધ્યૈન્કધ્યૈકધ્યૈન્-
શધ્યૈશધ્યૈન્તવૈતવેઙ્તવેનઃ ।
૩.૪.૧૦ પ્રયૈ રોહિષ્યૈ અવ્યથિષ્યૈ ।
૩.૪.૧૧ દૃશે વિખ્યે ચ ।
૩.૪.૧૨ શકિ ણમુલ્કમુલૌ ।
૩.૪.૧૩ ઈશ્વરે તોસુન્કસુનૌ ।
૩.૪.૧૪ કૃત્યાર્થે તવૈકેન્કેન્યત્વનઃ ।
૩.૪.૧૫ અવચક્ષે ચ ।
૩.૪.૧૬ ભાવલક્ષણે સ્થેણ્કૃઞ્વદિચરિહુતમિજનિભ્યસ્તોસુન્ ।
૩.૪.૧૭ સૃપિતૃદોઃ કસુન્ ।
૩.૪.૧૮ અલઙ્ખલ્વોઃ પ્રતિષેધયોઃ પ્રાચાં ક્ત્વા ।
૩.૪.૧૯ ઉદીચાં માઙો વ્યતીહારે ।
૩.૪.૨૦ પરાવરયોગે ચ ।
૩.૪.૨૧ સમાનકર્તૃકયોઃ પૂર્વકાલે ।
૩.૪.૨૨ આભીક્ષ્ણ્યે ણમુલ્ ચ ।
૩.૪.૨૩ ન યદ્યનાકાઙ્ક્ષે ।
૩.૪.૨૪ વિભાષાઽગ્રેપ્રથમપૂર્વેષુ ।
૩.૪.૨૫ કર્મણ્યાક્રોશે કૃઞઃ ખમુઞ્ ।
૩.૪.૨૬ સ્વાદુમિ ણમુલ્ ।
૩.૪.૨૭ અન્યથૈવંકથમિત્થંસુ સિદ્ધાપ્રયોગશ્ચેત્ ।
૩.૪.૨૮ યથાતથયોરસૂયાપ્રતિવચને ।
૩.૪.૨૯ કર્મણિ દૃશિવિદોઃ સાકલ્યે ।
૩.૪.૩૦ યાવતિ વિન્દજીવોઃ ।
૩.૪.૩૧ ચર્મોદરયોઃ પૂરેઃ ।
૩.૪.૩૨ વર્ષપ્રમાણ ઊલોપશ્ચાસ્યાન્યતરાસ્યમ્ ।

૩.૪.૩૩ ચેલે ક્નોપેઃ ।

૩.૪.૩૪ નિમૂલસમૂલયોઃ કષઃ ।

૩.૪.૩૫ શુષ્કચૂર્ણરૂક્ષેષુ પિષઃ ।

૩.૪.૩૬ સમૂલાકૃતજીવેષુ હન્કૃઞ્ગ્રહઃ ।

૩.૪.૩૭ કરણે હનઃ ।

૩.૪.૩૮ સ્નેહને પિષઃ ।

૩.૪.૩૯ હસ્તે વર્ત્તિગ્રહોઃ ।

૩.૪.૪૦ સ્વે પુષઃ ।

૩.૪.૪૧ અધિકરણે બન્ધઃ ।

૩.૪.૪૨ સંજ્ઞાયામ્ ।

૩.૪.૪૩ કર્ત્રોર્જીવપુરુષયોર્નશિવહોઃ ।

૩.૪.૪૪ ઊર્ધ્વે શુષિપૂરોઃ ।

૩.૪.૪૫ ઉપમાને કર્મણિ ચ ।

૩.૪.૪૬ કષાદિષુ યથાવિધ્યનુપ્રયોગઃ ।

૩.૪.૪૭ ઉપદંશસ્તૃતીયાયામ્ ।

૩.૪.૪૮ હિંસાર્થાનાં ચ સમાનકર્મકાણામ્ ।

૩.૪.૪૯ સપ્તમ્યાં ચોપપીડરુધકર્ષઃ ।

૩.૪.૫૦ સમાસત્તૌ ।

૩.૪.૫૧ પ્રમાણે ચ ।

૩.૪.૫૨ અપાદાને પરીપ્સાયામ્ ।

૩.૪.૫૩ દ્વિતીયાયાં ચ ।

૩.૪.૫૪ સ્વાઙ્ગેઽધ્રુવે ।

૩.૪.૫૫ પરિક્લિશ્યમાને ચ ।

૩.૪.૫૬ વિશિપતિપદિસ્કન્દાં વ્યાપ્યમાનાસેવ્યમાનયોઃ ।

૩.૪.૫૭ અસ્યતિતૃષોઃ ક્રિયાઽન્તરે કાલેષુ ।

૩.૪.૫૮ નામ્ન્યાદિશિગ્રહોઃ ।

૩.૪.૫૯ અવ્યયેઽયથાભિપ્રેતાખ્યાને કૃઞઃ ક્ત્વાણમુલૌ ।

૩.૪.૬૦ તિર્યચ્યપવર્ગે ।

૩.૪.૬૧ સ્વાઙ્ગે તસ્પ્રત્યયે કૃભ્વોઃ ।

૩.૪.૬૨ નાધાઽર્થપ્રત્યયે ચ્વ્યર્થે ।

૩.૪.૬૩ તૂષ્ણીમિ ભુવઃ ।

૩.૪.૬૪ અન્વચ્યાનુલોમ્યે ।

૩.૪.૬૫
શકધૃષજ્ઞાગ્લાઘટરભલભક્રમસહાર્હાસ્ત્યર્થેષુ તુમુન્ ।
૩.૪.૬૬ પર્યાપ્તિવચનેષ્વલમર્થેષુ ।
૩.૪.૬૭ કર્તરિ કૃત્ ।
૩.૪.૬૮ ભવ્યગેયપ્રવચનીયોપસ્થાનીયજન્યાપ્લાવ્યાપાત્યા વા ।
૩.૪.૬૯ લઃ કર્મણિ ચ ભાવે ચાકર્મકેભ્યઃ। ।
૩.૪.૭૦ તયોરેવ કૃત્યક્તખલર્થાઃ ।
૩.૪.૭૧ અદિકર્મણિ ક્તઃ કર્તરિ ચ ।
૩.૪.૭૨
ગત્યર્થાકર્મકશ્લિષશીઙ્સ્થાઽઽસવસજનરુહજીર્યતિભ્યશ્ચ
।
૩.૪.૭૩ દાશગોઘ્નૌ સમ્પ્રદાને ।
૩.૪.૭૪ ભીમાદયોઽપાદાને ।
૩.૪.૭૫ તાભ્યામન્યત્રોણાદયઃ ।
૩.૪.૭૬ ક્તોઽધિકરણે ચ ધ્રૌવ્યગતિપ્રત્યવસાનાર્થેભ્યઃ ।
૩.૪.૭૭ લસ્ય ।
૩.૪.૭૮ તિપ્તસ્ઝિસિપ્થસ્થમિબ્વસ્મસ્-
તાતાંઝથાસાથાંધ્વમિડ્વહિમહિઙ્ ।
૩.૪.૭૯ ટિત આત્મનેપદાનાં ટેરે ।
૩.૪.૮૦ થાસસ્સે ।
૩.૪.૮૧ લિટસ્તઝયોરેશિરેચ્ ।
૩.૪.૮૨ પરસ્મૈપદાનાં ણલતુસુસ્થલથુસણલ્વમાઃ ।
૩.૪.૮૩ વિદો લટો વા ।
૩.૪.૮૪ બ્રુવઃ પઞ્ચાનામાદિત આહો બ્રુવઃ ।
૩.૪.૮૫ લોટો લઙ્વત્ ।
૩.૪.૮૬ એરુઃ ।
૩.૪.૮૭ સેર્હ્યપિચ્ચ ।
૩.૪.૮૮ વા છન્દસિ ।
૩.૪.૮૯ મેર્નિઃ ।
૩.૪.૯૦ આમેતઃ ।
૩.૪.૯૧ સવાભ્યાં વામૌ ।
૩.૪.૯૨ આડુત્તમસ્ય પિચ્ચ ।

૩.૪.૯૩ એત ઐ ।

૩.૪.૯૪ લેટોऽડાટૌ ।

૩.૪.૯૫ આત ઐ ।

૩.૪.૯૬ વૈતોऽન્યત્ર ।

૩.૪.૯૭ ઇતશ્ચ લોપઃ પરસ્મૈપદેષુ ।

૩.૪.૯૮ સ ઉત્તમસ્ય ।

૩.૪.૯૯ નિત્યં ઙિતઃ ।

૩.૪.૧૦૦ ઇતશ્ચ ।

૩.૪.૧૦૧ તસ્થસ્થમિપાં તાંતંતામઃ ।

૩.૪.૧૦૨ લિઙસ્સીયુટ્ ।

૩.૪.૧૦૩ યાસુટ્ પરસ્મૈપદેષૂદાત્તો ઙિચ્ચ ।

૩.૪.૧૦૪ કિદાશિષિ ।

૩.૪.૧૦૫ ઝસ્ય રન્ ।

૩.૪.૧૦૬ ઇટોऽત્ ।

૩.૪.૧૦૭ સુટ્ તિથોઃ ।

૩.૪.૧૦૮ ઝેર્જુસ્ ।

૩.૪.૧૦૯ સિજભ્યસ્તવિદિભ્યઃ ચ ।

૩.૪.૧૧૦ આતઃ ।

૩.૪.૧૧૧ લઙઃ શાકટાયનસ્યૈવ ।

૩.૪.૧૧૨ દ્વિષશ્ચ ।

૩.૪.૧૧૩ તિઙ્શિત્સાર્વધાતુકમ્ ।

૩.૪.૧૧૪ આર્દ્ધધાતુકં શેષઃ ।

૩.૪.૧૧૫ લિટ્ ચ ।

૩.૪.૧૧૬ લિઙાશિષિ ।

૩.૪.૧૧૭ છન્દસ્યુભયથા ।

## ॥ અધ્યાય ૪ ॥

૪.૧.૧ ઙ્યાપ્પ્રાતિપદિકાત્ ।

૪.૧.૨ સ્વૌજસમૌટ્છષ્ટાભ્યાભ્મિસ્ઙેભ્યામ્ભ્યસ્ઙસિભ્યામ્ભ્યસ્-
ઙસોસામ્ઙ્યોસ્સુપ્ ।

૪.૧.૩ સ્ત્રિયામ્ ।

૪.૧.૪ અજાદ્યતષ્ટાપ્ ।

૪.૧.૫ ઋન્નેભ્યો ઙીપ્ ।

૪.૧.૬ ઉગિતશ્ચ ।

૪.૧.૭ વનો ર ચ ।

૪.૧.૮ પાદોઽન્યતરસ્યામ્ ।

૪.૧.૯ ટાબૃચિ ।

૪.૧.૧૦ ન ષટ્સ્વસ્રાદિભ્યઃ ।

૪.૧.૧૧ મનઃ ।

૪.૧.૧૨ અનો બહુવ્રીહેઃ ।

૪.૧.૧૩ ડાબુભાભ્યામન્યતરસ્યામ્ ।

૪.૧.૧૪ અનુપસર્જનાત્ ।

૪.૧.૧૫ ટિડ્ઢાણઞ્દ્વયસજ્દઘ્નઞ્માત્રચ્તયપ્ઠક્ઠઞ્કઞ્ક્વરપઃ
।

૪.૧.૧૬ યઞશ્ચ ।

૪.૧.૧૭ પ્રાચાં ષ્ફ તદ્ધિતઃ ।

૪.૧.૧૮ સર્વત્ર લોહિતાદિકતાન્તેભ્યઃ ।

૪.૧.૧૯ કૌરવ્યમાણ્ડૂકાભ્યાં ચ ।

૪.૧.૨૦ વયસિ પ્રથમે ।

૪.૧.૨૧ દ્વિગોઃ ।

૪.૧.૨૨ અપરિમાણબિસ્તાચિતકમ્બલ્યેભ્યો ન તદ્ધિતલુકિ ।

૪.૧.૨૩ કાણ્ડાન્તાત્ ક્ષેત્રે ।

૪.૧.૨૪ પુરુષાત્ પ્રમાણેઽન્યતરસ્યામ્ ।

૪.૧.૨૫ બહુવ્રીહેરૂધસો ઙીષ્।

૪.૧.૨૬ સંખ્યાઽવ્યયાદેર્ઙીપ્ ।

૪.૧.૨૭ દામહાયનાન્તાચ્ચ ।

૪.૧.૨૮ અન ઉપધાલોપિનોન્યતરસ્યામ્ ।

૪.૧.૨૯ નિત્યં સંજ્ઞાછન્દસોઃ ।

૪.૧.૩૦ કેવલમામકભાગધેયપાપાપરસમાનાર્યકૃત-
સુમઙ્ગલભેષજાચ્ચ ।

૪.૧.૩૧ રાત્રેશ્ચાજસૌ ।

૪.૧.૩૨ અન્તર્વત્પતિવતોર્નુક્ ।

૪.૧.૩૩ પત્યુર્નો યજ્ઞસંયોગે ।

૪.૧.૩૪ વિભાષા સપૂર્વસ્ય ।

૪.૧.૩૫ નિત્યં સપત્ન્યાદિષુ ।

૪.૧.૩૬ પૂતક્રતોરૈ ચ ।

૪.૧.૩૭ વૃષાકપ્યગ્નિકુસિતકુસીદાનામુદાત્તઃ ।

૪.૧.૩૮ મનોરૌ વા ।

૪.૧.૩૯ વર્ણાદનુદાત્તાત્તોપધાત્તો નઃ ।

૪.૧.૪૦ અન્યતો ઙીષ્।

૪.૧.૪૧ ષિદ્ગૌરાદિભ્યશ્ચ ।

૪.૧.૪૨ જાનપદકુણ્ડગોણસ્થલભાજનાગકાલનીલકુશકામુક-
કબરાદ્વૃત્ત્યમત્રાવપનાકૃત્રિમાશ્રાણાસ્થૌલ્ય-
વર્ણાનાચ્છાદનાયોવિકારમૈથુનેચ્છાકેશવેશેષુ ।

૪.૧.૪૩ શોણાત્ પ્રાચામ્ ।

૪.૧.૪૪ વોતો ગુણવચનાત્ ।

૪.૧.૪૫ બહ્વાદિભ્યશ્ચ ।

૪.૧.૪૬ નિત્યં છન્દસિ ।

૪.૧.૪૭ ભુવશ્ચ ।

૪.૧.૪૮ પુંયોગાદાખ્યાયામ્ ।

૪.૧.૪૯ ઇન્દ્રવરુણભવશર્વરુદ્રમૃડહિમારણ્યયવયવન-
માતુલાચાર્યાણામાનુક્ ।

૪.૧.૫૦ ક્રીતાત્ કરણપૂર્વાત્ ।

૪.૧.૫૧ ક્તાદલ્પાખ્યાયામ્ ।

૪.૧.૫૨ બહુવ્રીહેશ્ચાન્તોદાત્તાત્ ।

૪.૧.૫૩ અસ્વાઙ્ગપૂર્વપદાદ્વા ।

૪.૧.૫૪ સ્વાઙ્ગાચ્ચોપસર્જનાદસંયોગોપધાત્ ।

૪.૧.૫૫ નાસિકોદરૌષ્ઠજઙ્ઘાદન્તકર્ણશ‌ૃઙ્ગાચ્ચ ।

૪.૧.૫૬ ન ક્રોડાદિબહ્વચઃ ।

૪.૧.૫૭ સહનઞ્વિદ્યમાનપૂર્વાચ્ચ ।

૪.૧.૫૮ નખમુખાત્ સંજ્ઞાયામ્ ।

૪.૧.૫૯ દીર્ઘજિહ્વી ચ ચ્છન્દસિ ।

૪.૧.૬૦ દિક્પૂર્વપદાન્ઙીપ્ ।

૪.૧.૬૧ વાહઃ ।

૪.૧.૬૨ સખ્યશિશ્વીતિ ભાષાયામ્ ।

૪.૧.૬૩ જાતેરસ્ત્રીવિષયાદયોપધાત્ ।

૪.૧.૬૪ પાકકર્ણપર્ણપુષ્પફલમૂલબાલોત્તરપદાચ્ચ ।

૪.૧.૬૫ ઇતો મનુષ્યજાતેઃ ।

૪.૧.૬૬ ઊઙુતઃ ।

૪.૧.૬૭ બાહ્વન્તાત્ સંજ્ઞાયામ્ ।

૪.૧.૬૮ પઙ્ગોશ્ચ ।

૪.૧.૬૯ ઊરૂત્તરપદાદૌપમ્યે ।

૪.૧.૭૦ સંહિતશફલક્ષણવામાદેશ્ચ ।

૪.૧.૭૧ કદ્રુકમણ્ડલ્વોશ્છન્દસિ ।

૪.૧.૭૨ સંજ્ઞાયામ્ ।

૪.૧.૭૩ શાર્ઙ્ગરવાદ્યઞો ઙીન્ ।

૪.૧.૭૪ યઙશ્ચાપ્ ।

૪.૧.૭૫ આવટ્યાચ્ચ ।

૪.૧.૭૬ તદ્ધિતાઃ ।

૪.૧.૭૭ યૂનસ્તિઃ ।

૪.૧.૭૮ અણિઞોરનાર્ષયોર્ગુરૂપોત્તમયોઃ ષ્યઙ્ ગોત્રે ।

૪.૧.૭૯ ગોત્રાવયવાત્ ।

૪.૧.૮૦ ક્રૌડ્યાદિભ્યશ્ચ ।

૪.૧.૮૧ દૈવયજ્ઞિશૌચિવૃક્ષિસાત્યમુગ્રિ-
કાણ્ઠેવિદ્ધિભ્યોઽન્યતરસ્યામ્ ।

૪.૧.૮૨ સમર્થાનાં પ્રથમાદ્વા ।

૪.૧.૮૩ પ્રાગ્દીવ્યતોઽણ્ ।

૪.૧.૮૪ અશ્વપત્યાદિભ્યશ્ચ ।

૪.૧.૮૫ દિત્યદિત્યાદિત્યપત્યુત્તરપદાણ્ણ્યઃ ।

૪.૧.૮૬ ઉત્સાદિભ્યોઽઞ્ ।

૪.૧.૮૭ સ્ત્રીપુંસાભ્યાં નઞ્સ્નઞૌ ભવનાત્ ।

૪.૧.૮૮ દ્વિગોર્લુગનપત્યે ।

૪.૧.૮૯ ગોત્રેઽલુગચિ ।

૪.૧.૯૦ યૂનિ લુક્ ।

૪.૧.૯૧ ફક્ફિઞોરન્યતરસ્યામ્ ।

૪.૧.૯૨ તસ્યાપત્યમ્ ।

૪.૧.૯૩ એકો ગોત્રે ।

૪.૧.૯૪ ગોત્રાદ્યૂન્યસ્ત્રિયામ્ ।

૪.૧.૯૫ અત ઇઞ્ ।

૪.૧.૯૬ બાહ્વાદિભ્યશ્ચ ।

૪.૧.૯૭ સુધાતુરકઙ્ ચ ।

૪.૧.૯૮ ગોત્રે કુઞ્જાદિભ્યશ્ચ્ફઞ્ ।

૪.૧.૯૯ નડાદિભ્યઃ ફક્ ।

૬.૨.૫૯ રાજા ચ ।

૬.૨.૬૦ ષષ્ઠી પ્રત્યેનસિ ।

૬.૨.૬૧ ક્તે નિત્યાર્થે ।

૬.૨.૬૨ ગ્રામઃ શિલ્પિનિ ।

૬.૨.૬૩ રાજા ચ પ્રશંસાયામ્ ।

૬.૨.૬૪ આદિરુદાત્તઃ ।

૬.૨.૬૫ સપ્તમીહારિણૌ ધર્મ્યેઽહરણે ।

૬.૨.૬૬ યુક્તે ચ ।

૬.૨.૬૭ વિભાષાઽધ્યક્ષે ।

૬.૨.૬૮ પાપં ચ શિલ્પિનિ ।

૬.૨.૬૯ ગોત્રાન્તેવાસિમાણવબ્રાહ્મણેષુ ક્ષેપે ।

૬.૨.૭૦ અઙ્ગાનિ મૈરેયે ।

૬.૨.૭૧ ભક્તાખ્યાસ્તદર્થેષુ ।

૬.૨.૭૨ ગોબિડાલસિંહસૈન્ધવેષૂપમાને ।

૬.૨.૭૩ અકે જીવિકાઽર્થે ।

૬.૨.૭૪ પ્રાચાં ક્રીડાયામ્ ।

૬.૨.૭૫ અણિ નિયુક્તે ।

૬.૨.૭૬ શિલ્પિનિ ચાકૃઞઃ ।

૬.૨.૭૭ સંજ્ઞાયાં ચ ।

૬.૨.૭૮ ગોતન્તિયવં પાલે ।

૬.૨.૭૯ ણિનિ ।

૬.૨.૮૦ ઉપમાનં શબ્દાર્થપ્રકૃતાવેવ ।

૬.૨.૮૧ યુક્તારોહ્યાદયશ્ચ ।

૬.૨.૮૨ દીર્ઘકાશતુષભ્રાષ્ટ્રવટં જે ।

૬.૨.૮૩ અન્ત્યાત્ પૂર્વં બહ્વચઃ ।

૬.૨.૮૪ ગ્રામેઽનિવસન્તઃ ।

૬.૨.૮૫ ઘોષાદિષુ ।

૬.૨.૮૬ છાત્ર્યાદયઃ શાલાયામ્ ।

૬.૨.૮૭ પ્રસ્થેઽવૃદ્ધમકર્ક્યાદીનામ્ ।

૬.૨.૮૮ માલાઽઽદીનાં ચ ।

૬.૨.૮૯ અમહન્નવં નગરેઽનુદીચામ્ ।

૬.૨.૯૦ અર્મે ચાવર્ણં દ્વ્યચ્ત્ર્યચ્ ।

૬.૨.૯૧ ન ભૂતાધિકસંજીવમદ્રાશ્મકજ્જલમ્ ।

૬.૨.૯૨ અન્તઃ ।

૬.૨.૯૩ સર્વં ગુણકાર્ત્સ્ન્યે ।

૬.૨.૯૪ સંજ્ઞાયાં ગિરિનિકાયયોઃ ।

૬.૨.૯૫ કુમાર્યાં વયસિ ।

૬.૨.૯૬ ઉદકેઽકેવલે ।

૬.૨.૯૭ દ્વિગૌ ક્રતૌ ।

૬.૨.૯૮ સભાયાં નપુંસકે ।

૬.૨.૯૯ પુરે પ્રાચામ્ ।

૬.૨.૧૦૦ અરિષ્ટગૌડપૂર્વે ચ ।

૬.૨.૧૦૧ ન હાસ્તિનફલકમાર્દેયાઃ ।

૬.૨.૧૦૨ કુસૂલકૂપકુમ્ભશાલં બિલે ।

૬.૨.૧૦૩ દિક્શબ્દા ગ્રામજનપદાખ્યાનચાનરાટેષુ ।

૬.૨.૧૦૪ આચાર્યોપસર્જનશ્ચાન્તેવાસિનિ ।

૬.૨.૧૦૫ ઉત્તરપદવૃદ્ધૌ સર્વં ચ ।

૬.૨.૧૦૬ બહુવ્રીહૌ વિશ્વં સંજ્ઞાયામ્ ।

૬.૨.૧૦૭ ઉદરાશ્વેષુષુ ।

૬.૨.૧૦૮ ક્ષેપે ।

૬.૨.૧૦૯ નદી બન્ધુનિ ।

૬.૨.૧૧૦ નિષ્ઠોપસર્ગપૂર્વમન્યતરસ્યામ્ ।

૬.૨.૧૧૧ ઉત્તરપદાદિઃ ।

૬.૨.૧૧૨ કર્ણો વર્ણલક્ષણાત્ ।

૬.૨.૧૧૩ સંજ્ઞૌપમ્યયોશ્ચ ।

૬.૨.૧૧૪ કણ્ઠપૃષ્ઠગ્રીવાજંઘં ચ ।

૬.૨.૧૧૫ શ‍ૃઙ્ગમવસ્થાયાં ચ ।

૬.૨.૧૧૬ નઞો જરમરમિત્રમૃતાઃ ।

૬.૨.૧૧૭ સોર્મનસી અલોમોષસી ।

૬.૨.૧૧૮ ક્રત્વાદયશ્ચ ।

૬.૨.૧૧૯ આદ્યુદાત્તં દ્વ્યચ્ છન્દસિ ।

૬.૨.૧૨૦ વીરવીર્યૌ ચ ।

૬.૨.૧૨૧ કૂલતીરતૂલમૂલશાલાઽક્ષસમમવ્યયીભાવે ।

૬.૨.૧૨૨ કંસમન્થશૂર્પપાય્યકાણ્ડં દ્વિગૌ ।

૬.૨.૧૨૩ તત્પુરુષે શાલાયાં નપુંસકે ।

૬.૨.૧૨૪ કન્થા ચ ।

૬.૨.૧૨૫ આદિશ્ચિહણાદીનામ્ ।

૬.૨.૧૨૬ ચેલખેટકટુકકાણ્ડં ગર્હાયામ્ ।

૬.૨.૧૨૭ ચીરમુપમાનમ્ ।

૬.૨.૧૨૮ પલલસૂપશાકં મિશ્રે ।

૬.૨.૧૨૯ કૂલસૂદસ્થલકર્ષાઃ સંજ્ઞાયામ્ ।

૬.૨.૧૩૦ અકર્મધારયે રાજ્યમ્ ।

૬.૨.૧૩૧ વર્ગ્યાદયશ્ચ ।

૬.૨.૧૩૨ પુત્રઃ પુંભ્યઃ ।

૬.૨.૧૩૩ નાચાર્યરાજર્ત્વિક્સંયુક્તજ્ઞાત્યાખ્યેભ્યઃ ।

૬.૨.૧૩૪ ચૂર્ણાદીન્યપ્રાણિષષ્ઠ્યાઃ ।

૬.૨.૧૩૫ ષટ્ ચ કાણ્ડાદીનિ ।

૬.૨.૧૩૬ કુણ્ડં વનમ્ ।

૬.૨.૧૩૭ પ્રકૃત્યા ભગાલમ્ ।

૬.૨.૧૩૮ શિતેર્નિત્યાબહ્વજ્બહુવ્રીહાવભસત્ ।

૬.૨.૧૩૯ ગતિકારકોપપદાત્ કૃત્ ।

૬.૨.૧૪૦ ઉભે વનસ્પત્યાદિષુ યુગપત્ ।

૬.૨.૧૪૧ દેવતાદ્વંદ્વે ચ ।

૬.૨.૧૪૨ નોત્તરપદેઽનુદાત્તાદાવપૃથિવીરુદ્રપૂષમન્થિષુ ।

૬.૨.૧૪૩ અન્તઃ ।

૬.૨.૧૪૪ થાથઘઞ્ક્તાજબિત્રકાણામ્ ।

૬.૨.૧૪૫ સૂપમાનાત્ ક્તઃ ।

૬.૨.૧૪૬ સંજ્ઞાયામનાચિતાદીનામ્ ।

૬.૨.૧૪૭ પ્રવૃદ્ધાદીનાં ચ ।

૬.૨.૧૪૮ કારકાદ્દત્તશ્રુતયોરેવાશિષિ ।

૬.૨.૧૪૯ ઇત્થમ્ભૂતેન કૃતમિતિ ચ ।

૬.૨.૧૫૦ અનો ભાવકર્મવચનઃ ।

૬.૨.૧૫૧ મન્ક્તિન્વ્યાખ્યાનશયનાસનસ્થાનયાજકાદિક્રીતાઃ ।

૬.૨.૧૫૨ સપ્તમ્યાઃ પુણ્યમ્ ।

૬.૨.૧૫૩ ઊનાર્થકલહં તૃતીયાયાઃ ।

૬.૨.૧૫૪ મિશ્રં ચાનુપસર્ગમસંધૌ ।

૬.૨.૧૫૫ નઞો ગુણપ્રતિષેધે સમ્પાદ્યર્હહિતાલમર્થાસ્તદ્ધિતાઃ ।

૬.૨.૧૫૬ યયતોશ્ચાતદર્થે ।

૬.૨.૧૫૭ અચ્કાવશક્તૌ ।

૬.૨.૧૫૮ આક્રોશે ચ ।

૬.૨.૧૫૯ સંજ્ઞાયામ્ ।

૬.૨.૧૬૦ કૃત્યોકેષ્ણુચ્ચાર્વાદયશ્ચ ।

૬.૨.૧૬૧ વિભાષા તૃન્નન્નતીક્ષ્ણશુચિષુ ।

૬.૨.૧૬૨ બહુવ્રીહાવિદમેતત્તદ્ભ્યઃ પ્રથમપૂરણયોઃ ક્રિયાગણને ।

૬.૨.૧૬૩ સંખ્યાયાઃ સ્તનઃ ।

૬.૨.૧૬૪ વિભાષા છન્દસિ ।

૬.૨.૧૬૫ સંજ્ઞાયાં મિત્રાજિનયોઃ ।

૬.૨.૧૬૬ વ્યવાયિનોઽન્તરમ્ ।

૬.૨.૧૬૭ મુખં સ્વાઙ્ગમ્ ।

૬.૨.૧૬૮ નાવ્યયદિક્શબ્દગોમહત્સ્થૂલમુષ્ટિપૃથુવત્સેભ્યઃ ।

૬.૨.૧૬૯ નિષ્ઠોપમાનાદન્યતરસ્યામ્ ।

૬.૨.૧૭૦ જાતિકાલસુખાદિભ્યોઽનાચ્છાદનાત્
ક્તોઽકૃતમિતપ્રતિપન્નાઃ ।

૬.૨.૧૭૧ વા જાતે ।

૬.૨.૧૭૨ નઞ્સુભ્યામ્ ।

૬.૨.૧૭૩ કપિ પૂર્વમ્ ।

૬.૨.૧૭૪ હ્રસ્વાન્તેऽન્ત્યાત્ પૂર્વમ્ ।

૬.૨.૧૭૫ બહોર્નઞ્વદુત્તરપદભૂમ્નિ ।

૬.૨.૧૭૬ ન ગુણાદયોऽવયવાઃ ।

૬.૨.૧૭૭ ઉપસર્ગાત્ સ્વાઙ્ગં ધ્રુવમપર્શુ ।

૬.૨.૧૭૮ વનં સમાસે ।

૬.૨.૧૭૯ અન્તઃ ।

૬.૨.૧૮૦ અન્તશ્ચ ।

૬.૨.૧૮૧ ન નિવિભ્યામ્ ।

૬.૨.૧૮૨ પરેરભિતોભાવિમણ્ડલમ્ ।

૬.૨.૧૮૩ પ્રાદસ્વાઙ્ગં સંજ્ઞાયામ્ ।

૬.૨.૧૮૪ નિરુદકાદીનિ ચ ।

૬.૨.૧૮૫ અભેર્મુખમ્ ।

૬.૨.૧૮૬ અપાચ્ચ ।

૬.૨.૧૮૭ સ્ફિગપૂતવીણાऽઞ્જોऽધ્વકુક્ષિસીરનામનામ ચ ।

૬.૨.૧૮૮ અધેરુપરિસ્થમ્ ।

૬.૨.૧૮૯ અનોરપ્રધાનકનીયસી ।

૬.૨.૧૯૦ પુરુષશ્ચાન્વાદિષ્ટઃ ।

૬.૨.૧૯૧ અતેરકૃત્પદે ।

૬.૨.૧૯૨ નેરનિધાને ।

૬.૨.૧૯૩ પ્રતેરંશ્વાદયસ્તત્પુરુષે ।

૬.૨.૧૯૪ ઉપાદ્ દ્વ્યજજિનમગૌરાદયઃ ।

૬.૨.૧૯૫ સોરવક્ષેપણે ।

૬.૨.૧૯૬ વિભાષોત્પુચ્છે ।

૬.૨.૧૯૭ દ્વિત્રિભ્યાં પાદ્દન્મૂર્ધસુ બહુવ્રીહૌ ।

૬.૨.૧૯૮ સક્થં ચાક્રાન્તાત્ ।

૬.૨.૧૯૯ પરાદિશ્છન્દસિ બહુલમ્ ।

૬.૩.૧ અલુગુત્તરપદે ।

૬.૩.૨ પઞ્ચમ્યાઃ સ્તોકાદિભ્યઃ ।

૬.૩.૩ ઓજઃસહોऽમ્ભસ્તમસઃ તૃતીયાયાઃ ।

૬.૩.૪ મનસઃ સંજ્ઞાયામ્ ।

૬.૩.૫ આજ્ઞાયિનિ ચ ।

૬.૩.૬ આત્મનશ્ચ પૂરણે ।

૬.૩.૭ વૈયાકરણાખ્યાયાં ચતુર્થ્યાઃ ।

૬.૩.૮ પરસ્ય ચ ।

૬.૩.૯ હલદન્તાત્ સપ્તમ્યાઃ સંજ્ઞાયામ્ ।

૬.૩.૧૦ કારનામ્નિ ચ પ્રાચાં હલાદૌ ।

૬.૩.૧૧ મધ્યાદ્ગુરૌ ।

૬.૩.૧૨ અમૂર્ધમસ્તકાત્ સ્વાઙ્ગાદકામે ।

૬.૩.૧૩ બન્ધે ચ વિભાષા ।

૬.૩.૧૪ તત્પુરુષે કૃતિ બહુલમ્ ।

૬.૩.૧૫ પ્રાવૃટ્શરત્કાલદિવાં જે ।

૬.૩.૧૬ વિભાષા વર્ષક્ષરશરવરાત્ ।

૬.૩.૧૭ ઘકાલતનેષુ કાલનામ્નઃ ।

૬.૩.૧૮ શયવાસવાસિષુ અકાલાત્ ।

૬.૩.૧૯ નેન્સિદ્ધબધ્નાતિષુ ।

૬.૩.૨૦ સ્થે ચ ભાષાયામ્ ।

૬.૩.૨૧ ષષ્ઠ્યા આક્રોશે ।

૬.૩.૨૨ પુત્રેઽન્યતરસ્યામ્ ।

૬.૩.૨૩ ઋતો વિદ્યાયોનિસમ્બન્ધેભ્યઃ ।

૬.૩.૨૪ વિભાષા સ્વસૃપત્યોઃ ।

૬.૩.૨૫ આનઙ્ ઋતો દ્વંદ્વે ।

૬.૩.૨૬ દેવતાદ્વંદ્વે ચ ।

૬.૩.૨૭ ઈદગ્નેઃ સોમવરુણયોઃ ।

૬.૩.૨૮ ઇદ્વૃદ્ધૌ ।

૬.૩.૨૯ દિવો દ્યાવા ।

૬.૩.૩૦ દિવસશ્ચ પૃથિવ્યામ્ ।

૬.૩.૩૧ ઉષાસોષસઃ ।

૬.૩.૩૨ માતરપિતરાવુદીચામ્ ।

૬.૩.૩૩ પિતરામાતરા ચ ચ્છન્દસિ ।

૬.૩.૩૪ સ્ત્રિયાઃ પુંવદ્ભાષિતપુંસ્કાદનૂઙ્ સમાનાધિકરણે
સ્ત્રિયામપૂરણીપ્રિયાઽઽદિષુ ।

૬.૩.૩૫ તસિલાદિષુ આકૃત્વસુચઃ ।

૬.૩.૩૬ ક્યઙ્માનિનોશ્ચ ।

૬.૩.૩૭ ન કોપધાયાઃ ।

૬.૩.૩૮ સંજ્ઞાપૂરણ્યોશ્ચ ।

૬.૩.૩૯ વૃદ્ધિનિમિત્તસ્ય ચ તદ્ધિતસ્યારક્તવિકારે ।

૬.૩.૪૦ સ્વાઙ્ગાચ્ચેતોઽમાનિનિ ।

૬.૩.૪૧ જાતેશ્ચ ।

૬.૩.૪૨ પુંવત્ કર્મધારયજાતીયદેશીયેષુ ।

૬.૩.૪૩ ઘરૂપકલ્પચેલડ્બ્રુવગોત્રમતહતેષુ ઙ્યોઽનેકાચો
હ્રસ્વઃ ।

૬.૩.૪૪ નદ્યાઃ શેષસ્યાન્યતરસ્યામ્ ।

૬.૩.૪૫ ઉગિતશ્ચ ।

૬.૩.૪૬ આન્મહતઃ સમાનાધિકરણજાતીયયોઃ ।

૬.૩.૪૭ દ્વ્યષ્ટનઃ સંખ્યાયામબહુવ્રીહ્યશીત્યોઃ ।

૬.૩.૪૮ ત્રેસ્ત્રયઃ ।

૬.૩.૪૯ વિભાષા ચત્વારિંશત્પ્રભૃતૌ સર્વેષામ્ ।

૬.૩.૫૦ હૃદયસ્ય હૃલ્લેખયદણ્લાસેષુ ।

૬.૩.૫૧ વા શોકષ્યઞ્રોગેષુ ।

૬.૩.૫૨ પાદસ્ય પદાજ્યાતિગોપહતેષુ ।

૬.૩.૫૩ પદ્ યત્યતદર્થે ।

૬.૩.૫૪ હિમકાષિહતિષુ ચ ।

૬.૩.૫૫ ઋચઃ શે ।

૬.૩.૫૬ વા ઘોષમિશ્રશબ્દેષુ ।

૬.૩.૫૭ ઉદકસ્યોદઃ સંજ્ઞાયામ્ ।

૬.૩.૫૮ પેષંવાસવાહનધિષુ ચ ।

૬.૩.૫૯ એકહલાદૌ પૂરયિતવ્યેઽન્યતરસ્યામ્ ।

૬.૩.૬૦ મન્થૌદનસક્તુબિન્દુવજ્રભારહારવીવધગાહેષુ ચ ।

૬.૩.૬૧ ઇકો હ્રસ્વોઽઙ્યો ગાલવસ્ય ।

૬.૩.૬૨ એક તદ્ધિતે ચ ।

૬.૩.૬૩ ઙ્યાપોઃ સંજ્ઞાછન્દસોર્બહુલમ્ ।

૬.૩.૬૪ ત્વે ચ ।

૬.૩.૬૫ ઇષ્ટકેષીકામાલાનાં ચિતતૂલભારિષુ ।

૬.૩.૬૬ ખિત્યનવ્યયસ્ય ।

૬.૩.૬૭ અરુર્દ્વિષદજન્તસ્ય મુમ્ ।

૬.૩.૬૮ ઇચ એકાચોઽમ્પ્રત્યયવચ્ચ ।

૬.૩.૬૯ વાચંયમપુરંદરૌ ચ ।

૬.૩.૭૦ કારે સત્યાગદસ્ય ।

૬.૩.૭૧ શ્યેનતિલસ્ય પાતે ઞે ।

૬.૩.૭૨ રાત્રેઃ કૃતિ વિભાષા ।

૬.૩.૭૩ નલોપઃ નઞઃ ।

૬.૩.૭૪ તસ્માન્નુડચિ ।

૬.૩.૭૫ નભ્રાણ્નપાન્નવેદાનાસત્યાનમુચિનકુલનખ-
નપુંસકનક્ષત્રનક્રનાકેષુ પ્રકૃત્યા ।

૬.૩.૭૬ એકાદિશ્ચૈકસ્ય ચાદુક્ ।

૬.૩.૭૭ નગોઽપ્રાણિષ્વન્યતરસ્યામ્ ।

૬.૩.૭૮ સહસ્ય સઃ સંજ્ઞાયામ્ ।

૬.૩.૭૯ ગ્રન્થાન્તાધિકે ચ ।

૬.૩.૮૦ દ્વિતીયે ચાનુપાખ્યે ।

૬.૩.૮૧ અવ્યયીભાવે ચાકાલે ।

૬.૩.૮૨ વોપસર્જનસ્ય ।

૬.૩.૮૩ પ્રકૃત્યાઽઽશિષ્યગોવત્સહલેષુ ।

૬.૩.૮૪ સમાનસ્ય છન્દસ્યમૂર્ધપ્રભૃત્યુદર્કેષુ ।

૬.૩.૮૫ જ્યોતિર્જનપદરાત્રિનાભિનામગોત્રરૂપસ્થાનવર્ણ-
વયોવચનબન્ધુષુ ।

૬.૩.૮૬ ચરણે બ્રહ્મચારિણિ ।

૬.૩.૮૭ તીર્થે યે ।

૬.૩.૮૮ વિભાષોદરે ।

૬.૩.૮૯ દૃગ્દૃશવતુષુ ।

૬.૩.૯૦ ઇદઙ્કિમોરીશ્કી ।

૬.૩.૯૧ આ સર્વનામ્નઃ ।

૬.૩.૯૨ વિષ્વગ્દેવયોશ્ચ ટેરદ્ર્યઞ્ચતૌ વપ્રત્યયે ।

૬.૩.૯૩ સમઃ સમિ ।

૬.૩.૯૪ તિરસસ્તિર્યલોપે ।

૬.૩.૯૫ સહસ્ય સધ્રિઃ ।

૬.૩.૯૬ સધ માદસ્થયોશ્છન્દસિ ।

૬.૩.૯૭ દ્વ્યન્તરુપસર્ગેભ્યોઽપ ઈત્ ।

૬.૩.૯૮ ઊદનોર્દેશે ।

૬.૩.૯૯ અષષ્ઠ્યતૃતીયાસ્થસ્યાન્યસ્ય
દુગાશિરાશાઽઽસ્થાઽઽસ્થિતોત્સુકોતિકારકરાગચ્છેષુ ।

૬.૩.૧૦૦ અર્થે વિભાષા ।

૬.૩.૧૦૧ કોઃ કત્ તત્પુરુષેઽચિ ।

૬.૩.૧૦૨ રથવદયોશ્ચ ।

૬.૩.૧૦૩ તૃણે ચ જાતૌ ।

૬.૩.૧૦૪ કા પથ્યક્ષયોઃ ।

૬.૩.૧૦૫ ઈષદર્થે ।

૬.૩.૧૦૬ વિભાષા પુરુષે ।

૬.૩.૧૦૭ કવં ચોષ્ણે ।

૬.૩.૧૦૮ પથિ ચ ચ્છન્દસિ ।

૬.૩.૧૦૯ પૃષોદરાદીનિ યથોપદિષ્ટમ્ ।

૬.૩.૧૧૦ સંખ્યાવિસાયપૂર્વસ્યાહ્નસ્યાહન્નન્યતરસ્યાં ઙૌ ।

૬.૩.૧૧૧ ઢ્રલોપે પૂર્વસ્ય દીર્ઘોઽણઃ ।

૬.૩.૧૧૨ સહિવહોરોદવર્ણસ્ય ।

૬.૩.૧૧૩ સાઢ્યૈ સાઢ્વા સાઢેતિ નિગમે ।

૬.૩.૧૧૪ સંહિતાયામ્ ।

૬.૩.૧૧૫ કર્ણે લક્ષણસ્યાવિષ્ટાષ્ટપઞ્ચમણિભિન્ન-
છિન્નછિદ્રસ્રુવસ્વસ્તિકસ્ય ।

૬.૩.૧૧૬ નહિવૃતિવૃષિવ્યધિરુચિસહિતનિષુ ક્વૌ ।

૬.૩.૧૧૭ વનગિર્યોઃ સંજ્ઞાયાં કોટરકિંશુલકાદીનામ્ ।

૬.૩.૧૧૮ વલે ।

૬.૩.૧૧૯ મતૌ બહ્વચોઽનજિરાદીનામ્ ।

૬.૩.૧૨૦ શરાદીનાં ચ ।

૬.૩.૧૨૧ ઇકઃ વહે અપીલોઃ ।

૬.૩.૧૨૨ ઉપસર્ગસ્ય ઘઞ્યમનુષ્યે બહુલમ્ ।

૬.૩.૧૨૩ ઇકઃ કાશે ।

૬.૩.૧૨૪ દસ્તિ ।

૬.૩.૧૨૫ અષ્ટનઃ સંજ્ઞાયામ્ ।

૬.૩.૧૨૬ છન્દસિ ચ ।

૬.૩.૧૨૭ ચિતેઃ કપિ ।

૬.૩.૧૨૮ વિશ્વસ્ય વસુરાટોઃ ।

૬.૩.૧૨૯ નરે સંજ્ઞાયામ્ ।

૬.૩.૧૩૦ મિત્રે ચર્ષૌ ।

૬.૩.૧૩૧ મન્ત્રે સોમાશ્વેન્દ્રિયવિશ્વદેવ્યસ્ય મતૌ ।

૬.૩.૧૩૨ ઓષધેશ્ચ વિભક્તાવપ્રથમાયામ્ ।

૬.૩.૧૩૩ ઋચિ તુનુઘમક્ષુતઙ્કુત્રોરુષ્યાણામ્ ।

૬.૩.૧૩૪ ઇકઃ સુઞિ ।

૬.૩.૧૩૫ દ્વ્યચોઽતસ્તિઙઃ ।

૬.૩.૧૩૬ નિપાતસ્ય ચ ।

૬.૩.૧૩૭ અન્યેષામપિ દૃશ્યતે ।

૬.૩.૧૩૮ ચૌ ।

૬.૩.૧૩૯ સમ્પ્રસારણસ્ય ।

૬.૪.૧ અઙ્ગસ્ય ।

૬.૪.૨ હલઃ ।

૬.૪.૩ નામિ ।

૬.૪.૪ ન તિસૃચતસૃ ।

૬.૪.૫ છન્દસ્યુભયથા ।

૬.૪.૬ નૃ ચ ।

૬.૪.૭ નોપધાયાઃ ।

૬.૪.૮ સર્વનામસ્થાને ચાસમ્બુદ્ધૌ ।

૬.૪.૯ વા ષપૂર્વસ્ય નિગમે ।

૬.૪.૧૦ સાન્તમહતઃ સંયોગસ્ય ।

૬.૪.૧૧
અપ્તૃન્તૃચ્સ્વસૃનપ્તૃનેષ્ટૃત્વષ્ટૃક્ષત્તૃહોતૃપોતૃ-
પ્રશાસ્તૃણામ્ ।

૬.૪.૧૨ ઇન્હન્પૂષાર્યમ્ણાં શૌ ।

૬.૪.૧૩ સૌ ચ ।

૬.૪.૧૪ અત્વસન્તસ્ય ચાધાતોઃ ।

૬.૪.૧૫ અનુનાસિકસ્ય ક્વિઝલોઃ ક્ઙિતિ ।

૬.૪.૧૬ અજ્ઝનગમાં સનિ ।

૬.૪.૧૭ તનોતેર્વિભાષા ।

૬.૪.૧૮ ક્રમશ્ચ ક્ત્વિ ।

૬.૪.૧૯ ચ્છ્વોઃ શૂડનુનાસિકે ચ ।

૬.૪.૨૦ જ્વરત્વરશ્રિવ્યવિમવામુપધાયાશ્ચ ।

૬.૪.૨૧ રાલ્લોપઃ ।

૬.૪.૨૨ અસિદ્ધવદત્રાભાત્ ।

૬.૪.૨૩ શ્નાન્નલોપઃ ।

૬.૪.૨૪ અનિદિતાં હલ ઉપધાયાઃ ક્ડિતિ ।

૬.૪.૨૫ દન્શસઞ્જસ્વઞ્જાં શપિ ।

૬.૪.૨૬ રઞ્જેશ્ચ ।

૬.૪.૨૭ ઘઞિ ચ ભાવકરણયોઃ ।

૬.૪.૨૮ સ્યદો જવે ।

૬.૪.૨૯ અવોદૈધૌદ્મપ્રશ્રથહિમશ્રથાઃ ।

૬.૪.૩૦ નાઞ્ચેઃ પૂજાયામ્ ।

૬.૪.૩૧ ક્ત્વિ સ્કન્દિસ્યન્દોઃ ।

૬.૪.૩૨ જાન્તનશાં વિભાષા ।

૬.૪.૩૩ ભઞ્જેશ્ચ ચિણિ ।

૬.૪.૩૪ શાસ ઇદઙ્હલોઃ ।

૬.૪.૩૫ શા હૌ ।

૬.૪.૩૬ હન્તેર્જઃ ।

૬.૪.૩૭ અનુદાત્તોપદેશવનતિતનોત્યાદીનામનુનાસિકલોપો ઝલિ ક્ડિતિ ।

૬.૪.૩૮ વા લ્યપિ ।

૬.૪.૩૯ ન ક્તિચિ દીર્ઘશ્ચ ।

૬.૪.૪૦ ગમઃ ક્વૌ ।

૬.૪.૪૧ વિડ્વનોરનુનાસિકસ્યાત્ ।

૬.૪.૪૨ જનસનખનાં સઞ્ઝલોઃ ।

૬.૪.૪૩ યે વિભાષા ।

૬.૪.૪૪ તનોતેર્યકિ ।

૬.૪.૪૫ સનઃ ક્તિચિ લોપશ્ચાસ્યાન્યતરસ્યામ્ ।

૬.૪.૪૬ આર્ધધાતુકે ।

૬.૪.૪૭ ભ્રસ્જો રોપધયોઃ રમન્યતરસ્યામ્ ।

૬.૪.૪૮ અતો લોપઃ ।

૬.૪.૪૯ યસ્ય હલઃ ।

૬.૪.૫૦ ક્યસ્ય વિભાષા ।

૬.૪.૫૧ ણેરનિટિ ।

૬.૪.૫૨ નિષ્ઠાયાં સેટિ ।

૬.૪.૫૩ જનિતા મન્ત્રે ।

૬.૪.૫૪ શમિતા યજ્ઞે ।

૬.૪.૫૫ અયામન્તાલ્વાય્યેત્વિષ્ણુષુ ।

૬.૪.૫૬ લ્યપિ લઘુપૂર્વાત્ ।

૬.૪.૫૭ વિભાષાઽઽપઃ ।

૬.૪.૫૮ યુપ્લુવોર્દીર્ઘશ્છન્દસિ ।

૬.૪.૫૯ ક્ષિયઃ ।

૬.૪.૬૦ નિષ્ઠાયાં અણ્યદર્થે ।

૬.૪.૬૧ વાઽઽક્રોશદૈન્યયોઃ ।

૬.૪.૬૨ સ્યસિચ્સીયુટ્તાસિષુ ભાવકર્મણોર્-
ઉપદેશેઽજ્ઝનગ્રહદૃશાં વા ચિણ્વદિટ્ ચ ।

૬.૪.૬૩ દીઙો યુડચિ ક્ઙિતિ ।

૬.૪.૬૪ આતો લોપ ઇટિ ચ ।

૬.૪.૬૫ ઈદ્યતિ ।

૬.૪.૬૬ ઘુમાસ્થાગાપાજહાતિસાં હલિ ।

૬.૪.૬૭ એર્લિઙિ ।

૬.૪.૬૮ વાઽન્યસ્ય સંયોગાદેઃ ।

૬.૪.૬૯ ન લ્યપિ ।

૬.૪.૭૦ મયતેરિદન્યતરસ્યામ્ ।

૬.૪.૭૧ લુઙ્લઙ્લૃઙ્ક્ષ્વડુદાત્તઃ ।

૬.૪.૭૨ આડજાદીનામ્ ।

૬.૪.૭૩ છન્દસ્યપિ દૃશ્યતે ।

૬.૪.૭૪ ન માઙ્યોગે ।

૬.૪.૭૫ બહુલં છન્દસ્યમાઙ્યોગેઽપિ ।

૬.૪.૭૬ ઇરયો રે ।

૬.૪.૭૭ અચિ શ્નુધાતુભ્રુવાંય્વોરિયઙુવઙૌ ।

૬.૪.૭૮ અભ્યાસસ્યાસવર્ણે ।

૬.૪.૭૯ સ્ત્રિયાઃ ।

૬.૪.૮૦ વાઽમ્શસોઃ ।

૬.૪.૮૧ ઇણો યણ્ ।

૬.૪.૮૨ એરનેકાચોઽસંયોગપૂર્વસ્ય ।

૬.૪.૮૩ ઓઃ સુપિ ।

૬.૪.૮૪ વર્ષાભ્વશ્ચ ।

૬.૪.૮૫ ન ભૂસુધિયોઃ ।

૬.૪.૮૬ છન્દસ્યુભયથા ।

૬.૪.૮૭ હુશ્નુવોઃ સાર્વધાતુકે ।

૬.૪.૮૮ ભુવો વુગ્લુઙ્લિટોઃ ।

૬.૪.૮૯ ઊદુપધાયા ગોહઃ ।

૬.૪.૯૦ દોષો ણૌ ।

૬.૪.૯૧ વા ચિત્તવિરાગે ।

૬.૪.૯૨ મિતાં હ્રસ્વઃ ।

૬.૪.૯૩ ચિણ્ણમુલોર્દીર્ઘોઽન્યતરસ્યામ્ ।

૬.૪.૯૪ ખચિ હ્રસ્વઃ ।

૬.૪.૯૫ હ્લાદો નિષ્ઠાયામ્ ।

૬.૪.૯૬ છાદેર્ઘેઽદ્વ્યુપસર્ગસ્ય ।

૬.૪.૯૭ ઇસ્મન્ત્રન્ક્વિષુ ચ ।

૬.૪.૯૮ ગમહનજનખનઘસાં લોપઃ ક્ઙિત્યનઙિ ।

૬.૪.૯૯ તનિપત્યોશ્છન્દસિ ।

૬.૪.૧૦૦ ઘસિભસોર્હલિ ચ ।

૬.૪.૧૦૧ હુઝલ્ભ્યો હેર્ધિઃ ।

૬.૪.૧૦૨ શ્રુશ઼ૃણુપૃકૃવૃભ્યશ્છન્દસિ ।

૬.૪.૧૦૩ અઙિતશ્ચ ।

૬.૪.૧૦૪ ચિણો લુક્ ।

૬.૪.૧૦૫ અતો હેઃ ।

૬.૪.૧૦૬ ઉતશ્ચ પ્રત્યયાદસંયોગપૂર્વાત્ ।

૬.૪.૧૦૭ લોપશ્ચાસ્યાન્યતરસ્યાં મ્વોઃ ।

૬.૪.૧૦૮ નિત્યં કરોતેઃ ।

૬.૪.૧૦૯ યે ચ ।

૬.૪.૧૧૦ અત ઉત્ સાર્વધાતુકે ।

૬.૪.૧૧૧ શ્નસોરલ્લોપઃ ।

૬.૪.૧૧૨ શ્નાઽભ્યસ્તયોરાતઃ ।

૬.૪.૧૧૩ ઈ હલ્યઘોઃ ।

૬.૪.૧૧૪ ઇદ્દરિદ્રસ્ય ।

૬.૪.૧૧૫ ભિયોઽન્યતરસ્યામ્ ।

૬.૪.૧૧૬ જહાતેશ્ચ ।

૬.૪.૧૧૭ આ ચ હૌ ।

૬.૪.૧૧૮ લોપો યિ ।

૬.૪.૧૧૯ ઘ્વસોરેદ્ધાવભ્યાસલોપશ્ચ ।

૬.૪.૧૨૦ અત એકહલ્મધ્યેઽનાદેશાદેર્લિટિ ।

૬.૪.૧૨૧ થલિ ચ સેટિ ।

૬.૪.૧૨૨ તૃફલભજત્રપશ્ચ ।

૬.૪.૧૨૩ રાધો હિંસાયામ્ ।

૬.૪.૧૨૪ વા જૄભ્રમુત્રસામ્ ।

૬.૪.૧૨૫ ફણાં ચ સપ્તાનામ્ ।

૬.૪.૧૨૬ ન શસદદવાદિગુણાનામ્ ।

૬.૪.૧૨૭ અર્વણસ્ત્રસાવનઞઃ ।

૬.૪.૧૨૮ મઘવા બહુલમ્ ।

૬.૪.૧૨૯ ભસ્ય ।

૬.૪.૧૩૦ પાદઃ પત્ ।

૬.૪.૧૩૧ વસોઃ સમ્પ્રસારણમ્ ।

૬.૪.૧૩૨ વાહ ઊઠ્ ।

૬.૪.૧૩૩ શ્વયુવમઘોનામતદ્ધિતે ।

૬.૪.૧૩૪ અલ્લોપોઽનઃ ।

૬.૪.૧૩૫ ષપૂર્વહન્ધૃતરાજ્ઞામણિ ।

૬.૪.૧૩૬ વિભાષા ઙિશ્યોઃ ।

૬.૪.૧૩૭ ન સંયોગાદ્વમાન્તાત્ ।

૬.૪.૧૩૮ અચઃ ।

૬.૪.૧૩૯ ઉદ ઈત્ ।

૬.૪.૧૪૦ આતો ધાતોઃ ।

૬.૪.૧૪૧ મન્ત્રેષ્વાઙ્યાદેરાત્મનઃ ।

૬.૪.૧૪૨ તિ વિંશતેર્ડિતિ ।

૬.૪.૧૪૩ ટેઃ ।

૬.૪.૧૪૪ નસ્તદ્ધિતે ।

૬.૪.૧૪૫ અહ્નષ્ટખોરેવ ।

૬.૪.૧૪૬ ઓર્ગુણઃ ।
૬.૪.૧૪૭ ઢે લોપોऽકદ્રૂવાઃ ।
૬.૪.૧૪૮ યસ્યેતિ ચ ।
૬.૪.૧૪૯ સૂર્યતિષ્યાગસ્ત્યમત્સ્યાનાં ય ઉપધાયાઃ ।
૬.૪.૧૫૦ હલસ્તદ્ધિતસ્ય ।
૬.૪.૧૫૧ આપત્યસ્ય ચ તદ્ધિતેऽનાતિ ।
૬.૪.૧૫૨ ક્યચ્વ્યોશ્ચ ।
૬.૪.૧૫૩ બિલ્વકાદિભ્યશ્છસ્ય લુક્ ।
૬.૪.૧૫૪ તુરિષ્ઠેમેયસ્સુ ।
૬.૪.૧૫૫ ટેઃ ।
૬.૪.૧૫૬ સ્થૂલદૂરયુવહ્રસ્વક્ષિપ્રક્ષુદ્રાણાં યણાદિપરં પૂર્વસ્ય ચ ગુણઃ ।
૬.૪.૧૫૭ પ્રિયસ્થિરસ્ફિરોરુબહુલગુરુવૃદ્ધતૃપ્રદીર્ઘ-વૃન્દારકાણાં પ્રસ્થસ્ફવર્બંહિગર્વર્ષિત્રબ્દ્રાધિવૃન્દાઃ ।
૬.૪.૧૫૮ બહોર્લોપો ભૂ ચ બહોઃ ।
૬.૪.૧૫૯ ઇષ્ઠસ્ય યિટ્ ચ ।
૬.૪.૧૬૦ જ્યાદાદીયસઃ ।
૬.૪.૧૬૧ ર ઋતો હલાદેર્લઘોઃ ।
૬.૪.૧૬૨ વિભાષર્જોશ્છન્દસિ ।
૬.૪.૧૬૩ પ્રકૃત્યૈકાચ્ ।
૬.૪.૧૬૪ ઇનણ્યનપત્યે ।
૬.૪.૧૬૫ ગાથિવિદથિકેશિગણિપણિનશ્ચ ।
૬.૪.૧૬૬ સંયોગાદિશ્ચ ।
૬.૪.૧૬૭ અન્ ।
૬.૪.૧૬૮ યે ચાભાવકર્મણોઃ ।
૬.૪.૧૬૯ આત્માધ્વાનૌ ખે ।
૬.૪.૧૭૦ ન મપૂર્વોऽપત્યેऽવર્મણઃ ।
૬.૪.૧૭૧ બ્રાહ્મોઅજાતૌ ।
૬.૪.૧૭૨ કાર્મસ્તાચ્છીલ્યે ।
૬.૪.૧૭૩ ઔક્ષમનપત્યે ।
૬.૪.૧૭૪ દાણ્ડિનાયનહાસ્તિનાયનાથર્વણિકજૈહ્માશિનેય-વાશિનાયનિભ્રૌણહત્યધૈવત્યસારવૈક્ષ્વાકમૈત્રેયહિરણ્મયાનિ ।

૬.૪.૧૭૫ ઋત્વ્યવાસ્ત્વ્યવાસ્ત્વમાધ્વીહિરણ્યયાનિ ચ્છન્દસિ ।

## ॥ અધ્યાય ૭ ॥

૭.૧.૧ યુવોરનાકૌ ।

૭.૧.૨ આયનેયીનીયિયઃ ફઢખચ્છઘાં પ્રત્યયાદીનામ્ ।

૭.૧.૩ ઝોઽન્તઃ ।

૭.૧.૪ અદભ્યસ્તાત્ ।

૭.૧.૫ આત્મનેપદેષ્વનતઃ ।

૭.૧.૬ શીઙો રુટ્ ।

૭.૧.૭ વેત્તેર્વિભાષા ।

૭.૧.૮ બહુલં છન્દસિ ।

૭.૧.૯ અતો ભિસ ઐસ્ ।

૭.૧.૧૦ બહુલં છન્દસિ ।

૭.૧.૧૧ નેદમદસોરકોઃ ।

૭.૧.૧૨ ટાઙસિઙસામિનાત્સ્યાઃ ।

૭.૧.૧૩ ઙેર્યઃ ।

૭.૧.૧૪ સર્વનામ્નઃ સ્મૈ ।

૭.૧.૧૫ ઙસિઙ્યોઃ સ્માત્સ્મિનૌ ।

૭.૧.૧૬ પૂર્વાદિભ્યો નવભ્યો વા ।

૭.૧.૧૭ જસઃ શી ।

૭.૧.૧૮ ઔઙ આપઃ ।

૭.૧.૧૯ નપુંસકાચ્ચ ।

૭.૧.૨૦ જસ્શસોઃ શિઃ ।

૭.૧.૨૧ અષ્ટાભ્ય ઔશ્ ।

૭.૧.૨૨ ષડ્ભ્યો લુક્ ।

૭.૧.૨૩ સ્વમોર્નપુંસકાત્ ।

૭.૧.૨૪ અતોઽમ્ ।

૭.૧.૨૫ અદ્ડ્ ડતરાદિભ્યઃ પઞ્ચભ્યઃ ।

૭.૧.૨૬ નેતરાચ્છન્દસિ ।

૭.૧.૨૭ યુષ્મદસ્મદ્ભ્યાં ઙસોઽશ્ ।

૭.૧.૨૮ ઙે પ્રથમયોરમ્ ।

૭.૧.૨૯ શસો ન ।

૭.૧.૩૦ ભ્યસઃ ભ્યમ્ ।

૭.૧.૩૧ પઞ્ચમ્યા અત્ ।

૭.૧.૩૨ એકવચનસ્ય ચ ।

૭.૧.૩૩ સામ આકમ્ ।

૭.૧.૩૪ આત ઔ ણલઃ ।

૭.૧.૩૫ તુહ્યોસ્તાતઙાશિષ્યન્યતરસ્યામ્ ।

૭.૧.૩૬ વિદેઃ શતુર્વસુઃ ।

૭.૧.૩૭ સમાસેઽનઞ્પૂર્વે ક્ત્વો લ્યપ્ ।

૭.૧.૩૮ ક્ત્વાઽપિ છન્દસિ ।

૭.૧.૩૯ સુપાં સુલુક્પૂર્વસવર્ણાઽઽચ્છેયાઽઽડ્યાયાજાલઃ ।

૭.૧.૪૦ અમો મશ્ ।

૭.૧.૪૧ લોપસ્ત આત્મનેપદેષુ ।

૭.૧.૪૨ ધ્વમો ધ્વાત્ ।

૭.૧.૪૩ યજધ્વૈનમિતિ ચ ।

૭.૧.૪૪ તસ્ય તાત્ ।

૭.૧.૪૫ તપ્તનપ્તનથનાશ્ચ ।

૭.૧.૪૬ ઇદન્તો મસિ ।

૭.૧.૪૭ ક્ત્વો યક્ ।

૭.૧.૪૮ ઇષ્ટ્વીનમિતિ ચ ।

૭.૧.૪૯ સ્નાત્વ્યાદયશ્ચ ।

૭.૧.૫૦ આજ્જસેરસુક્ ।

૭.૧.૫૧ અશ્વક્ષીરવૃષલવણાનામાત્મપ્રીતૌ ક્યચિ ।

૭.૧.૫૨ આમિ સર્વનામ્નઃ સુટ્ ।

૭.૧.૫૩ ત્રેસ્ત્રયઃ ।

૭.૧.૫૪ હ્રસ્વનદ્યાપો નુટ્ ।

૭.૧.૫૫ ષટ્ચતુર્ભ્યશ્ચ ।

૭.૧.૫૬ શ્રીગ્રામણ્યોશ્છન્દસિ ।

૭.૧.૫૭ ગોઃ પાદાન્તે ।

૭.૧.૫૮ ઇદિતો નુમ્ ધાતોઃ ।

૭.૧.૫૯ શે મુચાદીનામ્ ।

૭.૧.૬૦ મસ્જિનશોર્ઝલિ ।

૭.૧.૬૧ રધિજભોરચિ ।

૭.૧.૬૨ નેટ્યલિટિ રધેઃ ।

૭.૧.૬૩ રભેરશબ્લિટોઃ ।

૭.૧.૬૪ લભેશ્ચ ।

૭.૧.૬૫ આઙો યિ ।

૭.૧.૬૬ ઉપાત્ પ્રશંસાયામ્ ।

૭.૧.૬૭ ઉપસર્ગાત્ ખલ્ઘઞોઃ ।

૭.૧.૬૮ ન સુદુર્ભ્યાં કેવલાભ્યામ્ ।

૭.૧.૬૯ વિભાષા ચિણ્ણમુલોઃ ।

૭.૧.૭૦ ઉગિદચાં સર્વનામસ્થાનેઽધાતોઃ ।

૭.૧.૭૧ યુજેરસમાસે ।

૭.૧.૭૨ નપુંસકસ્ય ઝલચઃ ।

૭.૧.૭૩ ઇકોઽચિ વિભક્તૌ ।

૭.૧.૭૪ તૃતીયાऽऽદિષુ ભાષિતપુંસ્કં પુંવદ્ગાલવસ્ય ।

૭.૧.૭૫ અસ્થિદધિસક્થ્યક્ષ્ણામનઙુદાત્તઃ ।

૭.૧.૭૬ છન્દસ્યપિ દૃશ્યતે ।

૭.૧.૭૭ ઈ ચ દ્વિવચને ।

૭.૧.૭૮ નાભ્યસ્તાચ્છતુઃ ।

૭.૧.૭૯ વા નપુંસકસ્ય ।

૭.૧.૮૦ આચ્છીનદ્યોર્નુમ્ ।

૭.૧.૮૧ શપ્શ્યનોર્નિત્યમ્ ।

૭.૧.૮૨ સાવનડુહઃ ।

૭.૧.૮૩ દૃક્સ્વવસ્સ્વતવસાં છન્દસિ ।

૭.૧.૮૪ દિવ ઔત્ ।

૭.૧.૮૫ પથિમથ્યૃભુક્ષામાત્ ।

૭.૧.૮૬ ઇતોઽત્ સર્વનામસ્થાને ।

૭.૧.૮૭ થો ન્થઃ ।

૭.૧.૮૮ ભસ્ય ટેર્લોપઃ ।

૭.૧.૮૯ પુંસોઽસુઙ્ ।

૭.૧.૯૦ ગોતો ણિત્ ।

૭.૧.૯૧ ણલુત્તમો વા ।

૭.૧.૯૨ સખ્યુરસમ્બુદ્ધૌ ।

૭.૧.૯૩ અનઙ્ સૌ ।

૭.૧.૯૪ ઋદુશનસ્પુરુદંશોઽનેહસાં ચ ।

૭.૧.૯૫ તૃજ્વત્ ક્રોષ્ટુઃ ।

૭.૧.૯૬ સ્ત્રિયાં ચ ।

૭.૧.૯૭ વિભાષા તૃતીયાઽઽદિષ્વચિ ।

૭.૧.૯૮ ચતુરનડુહોરામુદાત્તઃ ।

૭.૧.૯૯ અમ્ સમ્બુદ્ધૌ ।

૭.૧.૧૦૦ ૠત ઇદ્ધાતોઃ ।

૭.૧.૧૦૧ ઉપધાયાશ્ચ ।

૭.૧.૧૦૨ ઉદોષ્ઠ્યપૂર્વસ્ય ।

૭.૧.૧૦૩ બહુલં છન્દસિ ।

૭.૨.૧ સિચિ વૃદ્ધિઃ પરસ્મૈપદેષુ ।

૭.૨.૨ અતો ર્લાન્તસ્ય ।

૭.૨.૩ વદવ્રજહલન્તસ્યાચઃ ।

૭.૨.૪ નેટિ ।

૭.૨.૫ હ્મ્યન્તક્ષણશ્વસજાગૃણિશ્વ્યેદિતામ્ ।

૭.૨.૬ ઊર્ણોતેર્વિભાષા ।

૭.૨.૭ અતો હલાદેર્લઘોઃ ।

૭.૨.૮ નેડ્ વશિ કૃતિ ।

૭.૨.૯ તિતુત્રતથસિસુસરકસેષુ ચ ।

૭.૨.૧૦ એકાચ ઉપદેશેઽનુદાત્તાત્ ।

૭.૨.૧૧ શ્ર્યુકઃ કિતિ ।

૭.૨.૧૨ સનિ ગ્રહગુહોશ્ચ ।

૭.૨.૧૩ કૃસૃભૃવૃસ્તુદ્રુસ્રુશ્રુવો લિટિ ।

૭.૨.૧૪ શ્વીદિતો નિષ્ઠાયામ્ ।

૭.૨.૧૫ યસ્ય વિભાષા ।

૭.૨.૧૬ આદિતશ્ચ ।

૭.૨.૧૭ વિભાષા ભાવાદિકર્મણોઃ ।

૭.૨.૧૮ ક્ષુબ્ધસ્વાન્તધ્વાન્તલગ્નમ્લિષ્ટવિરિબ્ધફાણ્ટબાઢાનિ

મન્થમનસ્તમઃસક્તાવિસ્પષ્ટસ્વરાનાયાસભૃશેષુ ।

૭.૨.૧૯ ધૃષિશસી વૈયાત્યે ।

૭.૨.૨૦ દૃઢઃ સ્થૂલબલયોઃ ।
૭.૨.૨૧ પ્રભૌ પરિવૃઢઃ ।
૭.૨.૨૨ કૃચ્છ્રગહનયોઃ કષઃ ।
૭.૨.૨૩ ઘુષિરવિશબ્દને ।
૭.૨.૨૪ અર્દેઃ સંનિવિભ્યઃ ।
૭.૨.૨૫ અભેશ્ચાવિદૂર્યે ।
૭.૨.૨૬ ણેરધ્યયને વૃત્તમ્ ।
૭.૨.૨૭ વા દાન્તશાન્તપૂર્ણદસ્તસ્પષ્ટચ્છન્નજ્ઞપ્તાઃ ।
૭.૨.૨૮ રુષ્યમત્વરસંઘુષાસ્વનામ્ ।
૭.૨.૨૯ હૃષેર્લોમસુ ।
૭.૨.૩૦ અપચિતશ્ચ ।
૭.૨.૩૧ હ્રુ હ્વરેશ્છન્દસિ ।
૭.૨.૩૨ અપરિહ્વૃતાશ્ચ ।
૭.૨.૩૩ સોમે હ્વરિતઃ ।
૭.૨.૩૪ ગ્રસિતસ્કભિતસ્તભિતોત્તભિતચત્તવિકસ્તવિશસ્તૃ-
શંસ્તૃશાસ્તૃતરુતૃતરૂતૃવરુતૃવરૂતૃવરુત્રીરુજ્જ્વલિતિક્ષરિતિ-
ક્ષમિતિવમિત્યમિતીતિ ચ ।
૭.૨.૩૫ આર્ધધાતુકસ્યેડ્ વલાદેઃ ।
૭.૨.૩૬ સ્નુક્રમોરનાત્મનેપદનિમિત્તે ।
૭.૨.૩૭ ગ્રહોઽલિટિ દીર્ઘઃ ।
૭.૨.૩૮ વૃતો વા ।
૭.૨.૩૯ ન લિઙિ ।
૭.૨.૪૦ સિચિ ચ પરસ્મૈપદેષુ ।
૭.૨.૪૧ ઇટ્ સનિ વા ।
૭.૨.૪૨ લિઙ્સિચોરાત્મનેપદેષુ ।
૭.૨.૪૩ ઋતશ્ચ સંયોગાદેઃ ।
૭.૨.૪૪ સ્વરતિસૂતિસૂયતિધૂઞૂદિતો વા ।
૭.૨.૪૫ રધાદિભ્યશ્ચ ।
૭.૨.૪૬ નિરઃ કુષઃ ।
૭.૨.૪૭ ઇણ્નિષ્ઠાયામ્ ।
૭.૨.૪૮ તીષસહલુભરુષરિષઃ ।
૭.૨.૪૯ સનીવન્તર્ધભ્રસ્જદમ્ભુશ્રિસ્વૃયૂર્ણુભરજ્ઞપિસનામ્ ।

૭.૨.૫૦ ક્લિશઃ ક્ત્વાનિષ્ઠયોઃ ।

૭.૨.૫૧ પૂઙશ્ચ ।

૭.૨.૫૨ વસતિક્ષુધોરિટ્ ।

૭.૨.૫૩ અઞ્ચેઃ પૂજાયામ્ ।

૭.૨.૫૪ લુભો વિમોચને ।

૭.૨.૫૫ જૄવ્રશ્ચ્યોઃ ક્ત્વિ ।

૭.૨.૫૬ ઉદિતો વા ।

૭.૨.૫૭ સેઽસિચિ કૃતચૃતચ્છૃદતૃદનૃતઃ ।

૭.૨.૫૮ ગમેરિટ્ પરસ્મૈપદેષુ ।

૭.૨.૫૯ ન વૃદ્ભ્યશ્ચતુર્ભ્યઃ ।

૭.૨.૬૦ તાસિ ચ કॢપઃ ।

૭.૨.૬૧ અચસ્તાસ્વત્ થલ્યનિટો નિત્યમ્ ।

૭.૨.૬૨ ઉપદેશેઽત્વતઃ ।

૭.૨.૬૩ ઋતો ભારદ્વાજસ્ય ।

૭.૨.૬૪ બભૂથાતતન્થજગૃમ્ભવવર્થેતિ નિગમે ।

૭.૨.૬૫ વિભાષા સૃજિદૃષોઃ ।

૭.૨.૬૬ ઇઙત્ત્યર્તિવ્યયતીનામ્ ।

૭.૨.૬૭ વસ્વેકાજાદ્ઘસામ્ ।

૭.૨.૬૮ વિભાષા ગમહનવિદવિશામ્ ।

૭.૨.૬૯ સનિંસસનિવાંસમ્ ।

૭.૨.૭૦ ઋદ્ધનોઃ સ્યે ।

૭.૨.૭૧ અઞ્જેઃ સિચિ ।

૭.૨.૭૨ સ્તુસુધૂઞ્ભ્યઃ પરસ્મૈપદેષુ ।

૭.૨.૭૩ યમરમનમાતાં સક્ ચ ।

૭.૨.૭૪ સ્મિપૂઙ્રઞ્જ્વશાં સનિ ।

૭.૨.૭૫ કિરશ્ચ પઞ્ચભ્યઃ ।

૭.૨.૭૬ રુદાદિભ્યઃ સાર્વધતુકે ।

૭.૨.૭૭ ઈશઃ સે ।

૭.૨.૭૮ ઈડજનોર્ધ્વે ચ ।

૭.૨.૭૯ લિઙઃ સલોપોઽનન્ત્યસ્ય ।

૭.૨.૮૦ અતો યેયઃ ।

૭.૨.૮૧ આતો ઙિતઃ ।

૭.૨.૮૨ આને મુક્ ।

૭.૨.૮૩ ઈદાસઃ ।

૭.૨.૮૪ અષ્ટન આ વિભક્તૌ ।

૭.૨.૮૫ રાયો હલિ ।

૭.૨.૮૬ યુષ્મદસ્મદોરનાદેશે ।

૭.૨.૮૭ દ્વિતીયાયાં ચ ।

૭.૨.૮૮ પ્રથમાયાશ્ચ દ્વિવચને ભાષાયામ્ ।

૭.૨.૮૯ યોઽચિ ।

૭.૨.૯૦ શેષે લોપઃ ।

૭.૨.૯૧ મપર્યન્તસ્ય ।

૭.૨.૯૨ યુવાવૌ દ્વિવચને ।

૭.૨.૯૩ યૂયવયૌ જસિ ।

૭.૨.૯૪ ત્વાહૌ સૌ ।

૭.૨.૯૫ તુભ્યમહ્યૌ ઙયિ ।

૭.૨.૯૬ તવમમૌ ઙસિ ।

૭.૨.૯૭ ત્વમાવેકવચને ।

૭.૨.૯૮ પ્રતયોત્તરપદયોશ્ચ ।

૭.૨.૯૯ ત્રિચતુરોઃ સ્ત્રિયાં તિસૃચતસૃ ।

૭.૨.૧૦૦ અચિ ર ઋતઃ ।

૭.૨.૧૦૧ જરાયા જરસન્યતરસ્યામ્ ।

૭.૨.૧૦૨ ત્યદાદીનામઃ ।

૭.૨.૧૦૩ કિમઃ કઃ ।

૭.૨.૧૦૪ કુ તિહોઃ ।

૭.૨.૧૦૫ ક્વાતિ ।

૭.૨.૧૦૬ તદોઃ સઃ સાવનન્ત્યયોઃ ।

૭.૨.૧૦૭ અદસ ઔ સુલોપશ્ચ ।

૭.૨.૧૦૮ ઇદમો મઃ ।

૭.૨.૧૦૯ દશ્ચ ।

૭.૨.૧૧૦ યઃ સૌ ।

૭.૨.૧૧૧ ઇદોઽય્ પુંસિ ।

૭.૨.૧૧૨ અનાપ્યકઃ ।

૭.૨.૧૧૩ હલિ લોપઃ ।

૭.૨.૧૧૪ મૃજેર્વૃદ્ધિઃ ।

૭.૨.૧૧૫ અચો ઞ્ણિતિ ।

૭.૨.૧૧૬ અત ઉપધાયાઃ ।

૭.૨.૧૧૭ તદ્ધિતેષ્વચામાદેઃ ।

૭.૨.૧૧૮ કિતિ ચ ।

૭.૩.૧ દેવિકાશિંશપાદિત્યવાડ્દીર્ઘસત્રશ્રેયસામાત્ ।

૭.૩.૨ કેકયમિત્ત્રયુપ્રલયાનાં યાદેરિયઃ ।

૭.૩.૩ ન ય્વાભ્યાં પદાન્તાભ્યામ્ પૂર્વૌ તુ તાભ્યામૈચ્ ।

૭.૩.૪ દ્વારાદીનાં ચ ।

૭.૩.૫ ન્યગ્રોધસ્ય ચ કેવલસ્ય ।

૭.૩.૬ ન કર્મવ્યતિહારે ।

૭.૩.૭ સ્વાગતાદીનાં ચ ।

૭.૩.૮ શ્વાદેરિઞિ ।

૭.૩.૯ પદાન્તસ્યાન્યતરસ્યામ્ ।

૭.૩.૧૦ ઉત્તરપદસ્ય ।

૭.૩.૧૧ અવયવાદૃતોઃ ।

૭.૩.૧૨ સુસર્વાર્ધાજ્જનપદસ્ય ।

૭.૩.૧૩ દિશોઽમદ્રાણામ્ ।

૭.૩.૧૪ પ્રાચાં ગ્રામનગરાણામ્ ।

૭.૩.૧૫ સંખ્યાયાઃ સંવત્સરસંખ્યસ્ય ચ ।

૭.૩.૧૬ વર્ષસ્યાભવિષ્યતિ ।

૭.૩.૧૭ પરિમાણાન્તસ્યાસંજ્ઞાશાણયોઃ ।

૭.૩.૧૮ જે પ્રોષ્ઠપદાનામ્ ।

૭.૩.૧૯ હૃદ્ભગસિન્ધ્વન્તે પૂર્વપદસ્ય ચ ।

૭.૩.૨૦ અનુશતિકાદીનાં ચ ।

૭.૩.૨૧ દેવતાદ્વંદ્વે ચ ।

૭.૩.૨૨ નેન્દ્રસ્ય પરસ્ય ।

૭.૩.૨૩ દીર્ઘાચ્ચ વરુણસ્ય ।

૭.૩.૨૪ પ્રાચાં નગરાન્તે ।

૭.૩.૨૫ જઙ્ગલધેનુવલજાન્તસ્ય વિભાષિતમુત્તરમ્ ।

૭.૩.૨૬ અર્ધાત્ પરિમાણસ્ય પૂર્વસ્ય તુ વા ।

૭.૩.૨૭ નાતઃ પરસ્ય ।

૭.૩.૨૮ પ્રવાહણસ્ય ઢે ।

૭.૩.૨૯ તત્પ્રત્યયસ્ય ચ ।

૭.૩.૩૦ નઞઃ શુચીશ્વરક્ષેત્રજ્ઞકુશલનિપુણાનામ્ ।

૭.૩.૩૧ યથાતથયથાપુરયોઃ પર્યાયેણ ।

૭.૩.૩૨ હનસ્તોઽચિણ્ણલોઃ ।

૭.૩.૩૩ આતો યુક્ ચિણ્કૃતોઃ ।

૭.૩.૩૪ નોદાત્તોપદેશસ્ય માન્તસ્યાનાચમેઃ ।

૭.૩.૩૫ જનિવધ્યોશ્ચ ।

૭.૩.૩૬ અર્ત્તિહ્રીબ્લીરીક્નૂયીક્ષ્માય્યાતાં પુઙ્ણૌ ।

૭.૩.૩૭ શાચ્છાસાહ્વાવ્યાવેપાં યુક્ ।

૭.૩.૩૮ વો વિધૂનને જુક્ ।

૭.૩.૩૯ લીલોર્નુગ્લુકાવન્યતરસ્યાં સ્નેહવિપાતને ।

૭.૩.૪૦ ભિયો હેતુભયે ષુક્ ।

૭.૩.૪૧ સ્ફાયો વઃ ।

૭.૩.૪૨ શદેરગતૌ તઃ ।

૭.૩.૪૩ રુહઃ પોઽન્યતરસ્યામ્ ।

૭.૩.૪૪ પ્રત્યયસ્થાત્ કાત્ પૂર્વસ્યાત ઇદાપ્યસુપઃ ।

૭.૩.૪૫ ન યાસયોઃ ।

૭.૩.૪૬ ઉદીચામાતઃ સ્થાને યકપૂર્વાયાઃ ।

૭.૩.૪૭ ભસ્ત્રૈષાઽજાજ્ઞાદ્વાસ્વાનઞ્પૂર્વાણામપિ ।

૭.૩.૪૮ અભાષિતપુંસ્કાચ્ચ ।

૭.૩.૪૯ આદાચાર્યાણામ્ ।

૭.૩.૫૦ ઠસ્યેકઃ ।

૭.૩.૫૧ ઇસુસુક્તાન્તાત્ કઃ ।

૭.૩.૫૨ ચજોઃ કુ ઘિન્ણ્યતોઃ ।

૭.૩.૫૩ ન્યઙ્ક્વાદીનાં ચ ।

૭.૩.૫૪ હો હન્તેર્ઞ્ણિન્નેષુ ।

૭.૩.૫૫ અભ્યાસાચ્ચ ।

૭.૩.૫૬ હેરચઙિ ।

૭.૩.૫૭ સન્લિટોર્જેઃ ।

૭.૩.૫૮ વિભાષા ચેઃ ।

૭.૩.૫૯ ન ક્વાદેઃ ।

૭.૩.૬૦ અજિવૃજ્યોશ્ચ ।

૭.૩.૬૧ ભુજન્યુબ્જૌ પાણ્યુપતાપયોઃ ।

૭.૩.૬૨ પ્રયાજાનુયાજૌ યજ્ઞાઙ્ગે ।

૭.૩.૬૩ વઞ્ચેર્ગતૌ ।

૭.૩.૬૪ ઓક ઉચઃ કે ।

૭.૩.૬૫ ણ્ય આવશ્યકે ।

૭.૩.૬૬ યજયાચરુચપ્રવચર્ચશ્ચ ।

૭.૩.૬૭ વચોઽશબ્દસંજ્ઞાયામ્ ।

૭.૩.૬૮ પ્રયોજ્યનિયોજ્યૌ શક્યાર્થે ।

૭.૩.૬૯ ભોજ્યં ભક્ષ્યે ।

૭.૩.૭૦ ઘોર્લોપો લેટિ વા ।

૭.૩.૭૧ ઓતઃ શ્યનિ ।

૭.૩.૭૨ ક્સસ્યાચિ ।

૭.૩.૭૩ લુગ્વા દુહદિહલિહગુહામાત્મનેપદે દન્ત્યે ।

૭.૩.૭૪ શમામષ્ટાનાં દીર્ઘઃ શ્યનિ ।

૭.૩.૭૫ ષ્ઠિવુક્લમ્યાચમાં શિતિ ।

૭.૩.૭૬ ક્રમઃ પરસ્મૈપદેષુ ।

૭.૩.૭૭ ઇષુગમિયમાં છઃ ।

૭.૩.૭૮ પાઘ્રાધ્માસ્થામ્નાદાણ્દૃશ્યર્ત્તિસર્ત્તિશદસદાં
પિબજિઘ્રધમતિષ્ઠમનયચ્છપશ્યર્ચ્છધૌશીયસીદાઃ ।

૭.૩.૭૯ જ્ઞાજનોર્જા ।

૭.૩.૮૦ પ્વાદીનાં હ્રસ્વઃ ।

૭.૩.૮૧ મીનાતેર્નિગમે ।

૭.૩.૮૨ મિદેર્ગુણઃ ।

૭.૩.૮૩ જુસિ ચ ।

૭.૩.૮૪ સાર્વધાતુકાર્ધધાતુકયોઃ ।

૭.૩.૮૫ જાગ્રોઽવિચિણ્ણલ્ઙિત્સુ ।

૭.૩.૮૬ પુગન્તલઘૂપધસ્ય ચ ।

૭.૩.૮૭ નાભ્યસ્તસ્યાચિ પિતિ સાર્વધાતુકે ।

૭.૩.૮૮ ભૂસુવોસ્તિઙિ ।

૭.૩.૮૯ ઉતો વૃદ્ધિર્લુકિ હલિ ।

૭.૩.૯૦ ઊર્ણોતેર્વિભાષા ।

૭.૩.૯૧ ગુણોઽપૃક્તે ।

૭.૩.૯૨ તૃણહ ઇમ્ ।

૭.૩.૯૩ બ્રુવ ઈટ્ ।

૭.૩.૯૪ યઙો વા ।

૭.૩.૯૫ તુરુસ્તુશમ્યમઃ સાર્વધાતુકે ।

૭.૩.૯૬ અસ્તિસિચોઽપૃક્તે ।

૭.૩.૯૭ બહુલં છન્દસિ ।

૭.૩.૯૮ રુદશ્ચ પઞ્ચભ્યઃ ।

૭.૩.૯૯ અડ્ગાર્ગ્યગાલવયોઃ ।

૭.૩.૧૦૦ અદઃ સર્વેષામ્ ।

૭.૩.૧૦૧ અતો દીર્ઘો યઞિ ।

૭.૩.૧૦૨ સુપિ ચ ।

૭.૩.૧૦૩ બહુવચને ઝલ્યેત્ ।

૭.૩.૧૦૪ ઓઽસિ ચ ।

૭.૩.૧૦૫ આઙિ ચાપઃ ।

૭.૩.૧૦૬ સમ્બુદ્ધૌ ચ ।

૭.૩.૧૦૭ અમ્બાઽર્થનદ્યોર્હ્રસ્વઃ ।

૭.૩.૧૦૮ હ્રસ્વસ્ય ગુણઃ ।

૭.૩.૧૦૯ જસિ ચ ।

૭.૩.૧૧૦ ઋતો ઙિસર્વનામસ્થાનયોઃ ।

૭.૩.૧૧૧ ઘેર્ઙિતિ ।

૭.૩.૧૧૨ આણ્નદ્યાઃ ।

૭.૩.૧૧૩ યાડાપઃ ।

૭.૩.૧૧૪ સર્વનામ્નઃ સ્યાડ્ઢ્રસ્વશ્ચ ।

૭.૩.૧૧૫ વિભાષા દ્વિતીયાતૃતીયાભ્યામ્ ।

૭.૩.૧૧૬ ઙેરામ્નદ્યામ્નીભ્યઃ ।

૭.૩.૧૧૭ ઇદુદ્ભ્યામ્ ।

૭.૩.૧૧૮ ઔત્ ।

૭.૩.૧૧૯ અચ્ચ ઘેઃ ।

૭.૩.૧૨૦ આઙો નાઽસ્ત્રિયામ્ ।

૭.૪.૧ ણૌ ચઙ્યુપધાયા હ્રસ્વઃ ।

૭.૪.૨ નાગ્લોપિશાસ્વૃદિતામ્ ।

૭.૪.૩ ભ્રાજભાસભાષદીપજીવમીલપીડામન્યતરસ્યામ્ ।

૭.૪.૪ લોપઃ પિબતેરીચ્ચાભ્યાસસ્ય ।

૭.૪.૫ તિષ્ઠતેરિત્ ।

૭.૪.૬ જિઘ્રતેર્વા ।

૭.૪.૭ ઉરૃત્ ।

૭.૪.૮ નિત્યં છન્દસિ ।

૭.૪.૯ દયતેર્દિગિ લિટિ ।

૭.૪.૧૦ ઋતશ્ચ સંયોગાદેર્ગુણઃ ।

૭.૪.૧૧ ઋચ્છત્યૃતામ્ ।

૭.૪.૧૨ શ◌ૄદૄપ્રાં હ્રસ્વો વા ।

૭.૪.૧૩ કેઽણઃ ।

૭.૪.૧૪ ન કપિ ।

૭.૪.૧૫ આપોઽન્યતરસ્યામ્ ।

૭.૪.૧૬ ઋદૃશોઽઙિ ગુણઃ ।

૭.૪.૧૭ અસ્યતેસ્થુક્ ।

૭.૪.૧૮ શ્વયતેરઃ ।

૭.૪.૧૯ પતઃ પુમ્ ।

૭.૪.૨૦ વચ ઉમ્ ।

૭.૪.૨૧ શીઙઃ સાર્વધાતુકે ગુણઃ ।

૭.૪.૨૨ અયઙ્ યિ ક્ઙિતિ ।

૭.૪.૨૩ ઉપસર્ગાદ્ધ્રસ્વ ઊહતેઃ ।

૭.૪.૨૪ એતેર્લિઙિ ।

૭.૪.૨૫ અકૃત્સાર્વધાતુકયોર્દીર્ઘઃ ।

૭.૪.૨૬ ચ્વૌ ચ ।

૭.૪.૨૭ રીઙ્ ઋતઃ ।

૭.૪.૨૮ રિઙ્ શયગ્લિઙ્ક્ષુ ।

૭.૪.૨૯ ગુણોઽર્તિસંયોગાદ્યોઃ ।

૭.૪.૩૦ યઙિ ચ ।

૭.૪.૩૧ ઈ ઘ્રાધ્મોઃ ।

૭.૪.૩૨ અસ્ય ચ્વૌ ।

૭.૪.૩૩ ક્યચિ ચ ।

૭.૪.૩૪ અશનાયોદન્યધનાયા બુભુક્ષાપિપાસાગર્દ્ધેષુ ।

૭.૪.૩૫ ન ચ્છન્દસ્યપુત્રસ્ય ।

૭.૪.૩૬ દુરસ્યુર્દ્રવિણસ્યુર્વૃષણ્યતિરિષણ્યતિ ।

૭.૪.૩૭ અશ્વાઘસ્યાત્ ।

૭.૪.૩૮ દેવસુમ્નયોર્યજુષિ કાઠકે ।

૭.૪.૩૯ કવ્યધ્વરપૃતનસ્યર્ચિ લોપઃ ।

૭.૪.૪૦ દ્યતિસ્યતિમાસ્થામિત્તિ કિતિ ।

૭.૪.૪૧ શાછોરન્યતરસ્યામ્ ।

૭.૪.૪૨ દધાતેર્હિઃ ।

૭.૪.૪૩ જહાતેશ્ચ ક્ત્વિ ।

૭.૪.૪૪ વિભાષા છન્દસિ ।

૭.૪.૪૫ સુધિતવસુધિતનેમધિતધિષ્વધિષીય ચ ।

૭.૪.૪૬ દો દદ્ ઘોઃ ।

૭.૪.૪૭ અચ ઉપસર્ગાત્તઃ ।

૭.૪.૪૮ અપો ભિ ।

૭.૪.૪૯ સઃ સ્યાર્દ્ધધાતુકે ।

૭.૪.૫૦ તાસસ્ત્યોર્લોપઃ ।

૭.૪.૫૧ રિ ચ ।

૭.૪.૫૨ હ એતિ ।

૭.૪.૫૩ યીવર્ણયોર્દીધીવેવ્યોઃ ।

૭.૪.૫૪ સનિ મીમાઘુરભલભશકપતપદામચ ઇસ્ ।

૭.૪.૫૫ આપ્જ્ઞાપ્યૃધામીત્ ।

૭.૪.૫૬ દમ્ભ ઇચ્ચ ।

૭.૪.૫૭ મુચોઽકર્મકસ્ય ગુણો વા ।

૭.૪.૫૮ અત્ર લોપોઽભ્યાસસ્ય ।

૭.૪.૫૯ હ્રસ્વઃ ।

૭.૪.૬૦ હલાદિઃ શેષઃ ।

૭.૪.૬૧ શર્પૂર્વાઃ ખયઃ ।

૭.૪.૬૨ કુહોશ્ચુઃ ।

૭.૪.૬૩ ન કવતેર્યઙિ ।

૭.૪.૬૪ કૃષેશ્છન્દસિ ।

૭.૪.૬૫
દાધર્તિદર્ધર્તિદર્ધર્ષિબોભૂતુતેતિક્તેઽલર્ષ્યાપનીફણત્-

સંસનિષ્યદત્કરિક્રત્કનિક્રદદ્ભરિભ્રદ્વિધ્વતોદવિદ્યુતત્-
તરિત્રતઃસરીસૃપતંવરીવૃજન્મર્મૃજ્યાગનીગન્તીતિ ચ ।
૭.૪.૬૬ ઉરત્ ।
૭.૪.૬૭ દ્યુતિસ્વાપ્યોઃ સમ્પ્રસારણમ્ ।
૭.૪.૬૮ વ્યથો લિટિ ।
૭.૪.૬૯ દીર્ઘ ઇણઃ કિતિ ।
૭.૪.૭૦ અતઃ આદેઃ ।
૭.૪.૭૧ તસ્માન્નુડ્ દ્વિહલઃ ।
૭.૪.૭૨ અશ્નોતેશ્ચ ।
૭.૪.૭૩ ભવતેરઃ ।
૭.૪.૭૪ સસૂવેતિ નિગમે ।
૭.૪.૭૫ નિજાં ત્રયાણાં ગુણઃ શ્લૌ ।
૭.૪.૭૬ ભૃઞામિત્ ।
૭.૪.૭૭ અર્તિપિપર્ત્યોશ્ચ ।
૭.૪.૭૮ બહુલં છન્દસિ ।
૭.૪.૭૯ સન્યતઃ ।
૭.૪.૮૦ ઓઃ પુયણ્જ્યપરે ।
૭.૪.૮૧ સ્રવતિશૃણોતિદ્રવતિપ્રવતિપ્લવતિચ્યવતીનાં વા ।
૭.૪.૮૨ ગુણો યઙ્લુકોઃ ।
૭.૪.૮૩ દીર્ઘોઽકિતઃ ।
૭.૪.૮૪ નીગ્વઞ્ચુસ્રંસુધ્વંસુભ્રંસુકસપતપદસ્કન્દામ્ ।
૭.૪.૮૫ નુગતોઽનુનાસિકાન્તસ્ય ।
૭.૪.૮૬ જપજભદહદશભઞ્જપશાં ચ ।
૭.૪.૮૭ ચરફલોશ્ચ ।
૭.૪.૮૮ ઉત્ પરસ્યાતઃ ।
૭.૪.૮૯ તિ ચ ।
૭.૪.૯૦ રીગૃદુપધસ્ય ચ ।
૭.૪.૯૧ રુગ્રિકૌ ચ લુકિ ।
૭.૪.૯૨ ઋતશ્ચ ।
૭.૪.૯૩ સન્વલ્લઘુનિ ચઙ્પરેઽનગ્લોપે ।
૭.૪.૯૪ દીર્ઘો લઘોઃ ।
૭.૪.૯૫ અત્ સ્મૃદૃત્વરપ્રથમ્રદસ્તૃસ્પશામ્ ।

૭.૪.૯૬ વિભાષા વેષ્ટિચેષ્ટ્યોઃ ।

૭.૪.૯૭ ઈ ચ ગણઃ ।

## ॥ અધ્યાય ૮ ॥

૮.૧.૧ સર્વસ્ય દ્વે ।

૮.૧.૨ તસ્ય પરમામ્રેડિતમ્ ।

૮.૧.૩ અનુદાત્તં ચ ।

૮.૧.૪ નિત્યવીપ્સયોઃ ।

૮.૧.૫ પરેર્વર્જને ।

૮.૧.૬ પ્રસમુપોદઃ પાદપૂરણે ।

૮.૧.૭ ઉપર્યધ્યધસઃ સામીપ્યે ।

૮.૧.૮ વાક્યાદેરામન્ત્રિતસ્યાસૂયાસમ્મતિકોપકુત્સનભર્ત્સનેષુ ।

૮.૧.૯ એકં બહુવ્રીહિવત્ ।

૮.૧.૧૦ આબાધે ચ ।

૮.૧.૧૧ કર્મધારયવત્ ઉત્તરેષુ ।

૮.૧.૧૨ પ્રકારે ગુણવચનસ્ય ।

૮.૧.૧૩ અકૃચ્છ્રે પ્રિયસુખયોરન્યતરસ્યામ્ ।

૮.૧.૧૪ યથાસ્વે યથાયથમ્ ।

૮.૧.૧૫ દ્વન્દ્વં રહસ્યમર્યાદાવચનવ્યુત્ક્રમણ-
યજ્ઞપાત્રપ્રયોગાભિવ્યક્તિષુ ।

૮.૧.૧૬ પદસ્ય ।

૮.૧.૧૭ પદાત્ ।

૮.૧.૧૮ અનુદાત્તં સર્વમપાદાદૌ ।

૮.૧.૧૯ આમન્ત્રિતસ્ય ચ ।

૮.૧.૨૦ યુષ્મદસ્મદોઃ ષષ્ઠીચતુર્થીદ્વિતીયાસ્થયોર્વાન્નાવૌ ।

૮.૧.૨૧ બહુવચને વસ્નસૌ ।

૮.૧.૨૨ તેમયાવેકવચનસ્ય ।

૮.૧.૨૩ ત્વામૌ દ્વિતીયાયાઃ ।

૮.૧.૨૪ ન ચવાહાહૈવયુક્તે ।

૮.૧.૨૫ પશ્યાર્થૈશ્ચાનાલોચને ।

૮.૧.૨૬ સપૂર્વાયાઃ પ્રથમાયા વિભાષા ।

૮.૧.૨૭ તિઙો ગોત્રાદીનિ કુત્સનાભીક્ષ્ણ્યયોઃ ।

૮.૧.૨૮ તિઙ્ઙતિઙઃ ।

૮.૧.૨૯ ન લુટ્ ।

૮.૧.૩૦ નિપાતૈર્યદ્યદિહન્તકુવિન્નેચ્ચેચ્ચણ્કચ્ચિદ્યત્રયુક્તમ્ ।

૮.૧.૩૧ નહ પ્રત્યારમ્ભે ।

૮.૧.૩૨ સત્યં પ્રશ્ને ।

૮.૧.૩૩ અઙ્ગાપ્રાતિલોમ્યે ।

૮.૧.૩૪ હિ ચ ।

૮.૧.૩૫ છન્દસ્યનેકમપિ સાકાઙ્ક્ષમ્ ।

૮.૧.૩૬ યાવદ્યથાભ્યામ્ ।

૮.૧.૩૭ પૂજાયાં નાનન્તરમ્ ।

૮.૧.૩૮ ઉપસર્ગવ્યપેતં ચ ।

૮.૧.૩૯ તુપશ્યપશ્યતાહૈઃ પૂજાયામ્ ।

૮.૧.૪૦ અહો ચ ।

૮.૧.૪૧ શેષે વિભાષા ।

૮.૧.૪૨ પુરા ચ પરીપ્સાયામ્ ।

૮.૧.૪૩ નન્વિત્યનુજ્ઞૈષણાયામ્ ।

૮.૧.૪૪ કિં ક્રિયાપ્રશ્નેઽનુપસર્ગમપ્રતિષિદ્ધમ્ ।

૮.૧.૪૫ લોપે વિભાષા ।

૮.૧.૪૬ એહિમન્યે પ્રહાસે લૃટ્ ।

૮.૧.૪૭ જાત્વપૂર્વમ્ ।

૮.૧.૪૮ કિમ્વૃત્તં ચ ચિદુત્તરમ્ ।

૮.૧.૪૯ આહો ઉતાહો ચાનન્તરમ્ ।

૮.૧.૫૦ શેષે વિભાષા ।

૮.૧.૫૧ ગત્યર્થલોટા લૃણ્ન ચેત્ કારકં સર્વાન્યત્ ।

૮.૧.૫૨ લોટ્ ચ ।

૮.૧.૫૩ વિભાષિતં સોપસર્ગમનુત્તમમ્ ।

૮.૧.૫૪ હન્ત ચ ।

૮.૧.૫૫ આમ એકાન્તરમામન્ત્રિતમનન્તિકે ।

૮.૧.૫૬ યદ્ધિતુપરં છન્દસિ ।

૮.૧.૫૭ ચનચિદિવગોત્રાદિતદ્ધિતામ્રેડિતેષ્વગતેઃ ।

૮.૧.૫૮ ચાદિષુ ચ ।

૮.૧.૫૯ ચવાયોગે પ્રથમા ।

૮.૧.૬૦ હેતિ ક્ષિયાયામ્ ।

૮.૧.૬૧ અહેતિ વિનિયોગે ચ ।

૮.૧.૬૨ ચાહલોપ એવેત્યવધારણમ્ ।

૮.૧.૬૩ ચાદિલોપે વિભાષા ।

૮.૧.૬૪ વૈવાવેતિ ચ ચ્છન્દસિ ।

૮.૧.૬૫ એકાન્યાભ્યાં સમર્થાભ્યામ્ ।

૮.૧.૬૬ યદ્વૃત્તાન્નિત્યં ।

૮.૧.૬૭ પૂજનાત્ પૂજિતમનુદાત્તમ્ (કાષ્ઠાદિભ્યઃ) ।

૮.૧.૬૮ સગતિરપિ તિઙ્ ।

૮.૧.૬૯ કુત્સને ચ સુપ્યગોત્રાદૌ ।

૮.૧.૭૦ ગતિર્ગતૌ ।

૮.૧.૭૧ તિઙિ ચોદાત્તવતિ ।

૮.૧.૭૨ આમન્ત્રિતં પૂર્વમ્ અવિદ્યમાનવત્ ।

૮.૧.૭૩ નામન્ત્રિતે સમાનાધિકરણે (સામાન્યવચનમ્) ।

૮.૧.૭૪ (સામાન્યવચનં) વિભાષિતં વિશેષવચને
(બહુવચનમ્) ।

૮.૨.૧ પૂર્વત્રાસિદ્ધમ્ ।

૮.૨.૨ નલોપઃ સુપ્સ્વરસંજ્ઞાતુગ્વિધિષુ કૃતિ ।

૮.૨.૩ ન મુ ને ।

૮.૨.૪ ઉદાત્તસ્વરિતયોર્યણઃ સ્વરિતોઽનુદાત્તસ્ય ।

૮.૨.૫ એકાદેશ ઉદાત્તેનોદાત્તઃ ।

૮.૨.૬ સ્વરિતો વાઽનુદાત્તે પદાદૌ ।

૮.૨.૭ નલોપઃ પ્રાતિપદિકાન્તસ્ય ।

૮.૨.૮ ન ઙિસમ્બુદ્ધ્યોઃ ।

૮.૨.૯ માદુપધાયાશ્ચ મતોર્વોઽયવાદિભ્યઃ ।

૮.૨.૧૦ ઝયઃ ।

૮.૨.૧૧ સંજ્ઞાયામ્ ।

૮.૨.૧૨ આસન્દીવદષ્ઠીવચ્ચક્રીવત્કક્ષીવદ્રુમણ્વચ્ચર્મણ્વતી ।

૮.૨.૧૩ ઉદન્વાનુદધૌ ચ ।

૮.૨.૧૪ રાજન્વાન્ સૌરાજ્યે ।

૮.૨.૧૫ છન્દસીરઃ ।

૮.૨.૧૬ અનો નુટ્ ।

૮.૨.૧૭ નાદ્ઘસ્ય ।

૮.૨.૧૮ કૃપો રો લઃ ।

૮.૨.૧૯ ઉપસર્ગસ્યાયતૌ ।

૮.૨.૨૦ ગ્રો યઙિ ।

૮.૨.૨૧ અચિ વિભાષા ।

૮.૨.૨૨ પરેશ્ચ ઘાઙ્કયોઃ ।

૮.૨.૨૩ સંયોગાન્તસ્ય લોપઃ ।

૮.૨.૨૪ રાત્ સસ્ય ।

૮.૨.૨૫ ધિ ચ ।

૮.૨.૨૬ ઝલો ઝલિ ।

૮.૨.૨૭ હ્રસ્વાદઙ્ગાત્ ।

૮.૨.૨૮ ઇટ ઈટિ ।

૮.૨.૨૯ સ્કોઃ સંયોગાદ્યોરન્તે ચ ।

૮.૨.૩૦ ચોઃ કુઃ ।

૮.૨.૩૧ હો ઢઃ ।

૮.૨.૩૨ દાદેર્ધાતોર્ઘઃ ।

૮.૨.૩૩ વા દ્રુહમુહષ્ણુહષ્ણિહામ્ ।

૮.૨.૩૪ નહો ધઃ ।

૮.૨.૩૫ આહસ્થઃ ।

૮.૨.૩૬ વ્રશ્ચભ્રસ્જસૃજમૃજયજરાજભ્રાજચ્છશાં ષઃ ।

૮.૨.૩૭ એકાચો બશો ભષ્ ઝષન્તસ્ય સ્ધ્વોઃ ।

૮.૨.૩૮ દધસ્તથોશ્ચ ।

૮.૨.૩૯ ઝલાં જશોઽન્તે ।

૮.૨.૪૦ ઝષસ્તથોર્ધોઽધઃ ।

૮.૨.૪૧ ષઢોઃ કઃ સિ ।

૮.૨.૪૨ રદાભ્યાં નિષ્ઠાતો નઃ પૂર્વસ્ય ચ દઃ ।

૮.૨.૪૩ સંયોગાદેરાતો ધાતોર્યણ્વતઃ ।

૮.૨.૪૪ લ્વાદિભ્યઃ ।

૮.૨.૪૫ ઓદિતશ્ચ ।

૮.૨.૪૬ ક્ષિયો દીર્ઘાત્ ।

૮.૨.૪૭ શ્યોઽસ્પર્શે ।

૮.૨.૪૮ અઞ્ચોઽનપાદાને ।

૮.૨.૪૯ દિવોઽવિજિગીષાયામ્ ।

૮.૨.૫૦ નિર્વાણોઽવાતે ।

૮.૨.૫૧ શુષઃ કઃ ।

૮.૨.૫૨ પચો વઃ ।

૮.૨.૫૩ ક્ષાયો મઃ ।

૮.૨.૫૪ પ્રસ્ત્યોઽન્યતરસ્યામ્ ।

૮.૨.૫૫ અનુપસર્ગાત્ ફુલ્લક્ષીબકૃશોલ્લાઘાઃ ।

૮.૨.૫૬ નુદવિદોન્દત્રાઘ્રાહ્રીભ્યોઽન્યતરસ્યામ્ ।

૮.૨.૫૭ ન ધ્યાખ્યાપૃમૂર્છિમદામ્ ।

૮.૨.૫૮ વિત્તો ભોગપ્રત્યયયોઃ ।

૮.૨.૫૯ ભિત્તં શકલમ્ ।

૮.૨.૬૦ ઋણમાધમર્ણ્યે ।

૮.૨.૬૧ નસત્તનિષત્તાનુત્તપ્રતૂર્તસૂર્તગૂર્તાનિ છન્દસિ ।

૮.૨.૬૨ ક્વિન્પ્રત્યયસ્ય કુઃ ।

૮.૨.૬૩ નશેર્વા ।

૮.૨.૬૪ મો નો ધાતોઃ ।

૮.૨.૬૫ મ્વોશ્ચ ।

૮.૨.૬૬ સસજુષો રુઃ ।

૮.૨.૬૭ અવયાઃશ્વેતવાઃપુરોડાશ્ચ ।

૮.૨.૬૮ અહન્ ।

૮.૨.૬૯ રોઽસુપિ ।

૮.૨.૭૦ અમ્નરૂધરવરિત્યુભયથા છન્દસિ ।

૮.૨.૭૧ ભુવશ્ચ મહાવ્યાહૃતેઃ ।

૮.૨.૭૨ વસુસ્રંસુધ્વંસ્વનડુહાં દઃ ।

૮.૨.૭૩ તિપ્યનસ્તેઃ ।

૮.૨.૭૪ સિપિ ધાતો રુર્વા ।

૮.૨.૭૫ દશ્ચ ।

૮.૨.૭૬ ર્વોરુપધાયા દીર્ઘ ઇકઃ ।

૮.૨.૭૭ હલિ ચ ।

૮.૨.૭૮ ઉપધાયાં ચ ।

૮.૨.૭૯ ન ભકુર્છુરામ્ ।

૮.૨.૮૦ અદસોઽસેર્દાદુ દો મઃ ।

૮.૨.૮૧ એત ઈદ્બહુવચને ।

૮.૨.૮૨ વાક્યસ્ય ટેઃ પ્લુત ઉદાત્તઃ ।

૮.૨.૮૩ પ્રત્યભિવાદેઅશૂદ્રે ।

૮.૨.૮૪ દૂરાદ્ધૂતે ચ ।

૮.૨.૮૫ હૈહેપ્રયોગે હૈહયોઃ ।

૮.૨.૮૬ ગુરોરનૃતોઽનન્ત્યસ્યાપ્યેકૈકસ્ય પ્રાચામ્ ।

૮.૨.૮૭ ઓમભ્યાદાને ।

૮.૨.૮૮ યે યજ્ઞકર્મણિ ।

૮.૨.૮૯ પ્રણવષ્ટેઃ ।

૮.૨.૯૦ યાજ્યાઽન્તઃ ।

૮.૨.૯૧ બ્રૂહિપ્રેસ્યશ્રૌષડ્વૌષડાવહાનામાદેઃ ।

૮.૨.૯૨ અગ્નીત્પ્રેષણે પરસ્ય ચ ।

૮.૨.૯૩ વિભાષા પૃષ્ટપ્રતિવચને હેઃ ।

૮.૨.૯૪ નિગૃહ્યાનુયોગે ચ ।

૮.૨.૯૫ આમ્રેડિતં ભર્ત્સને ।

૮.૨.૯૬ અઙ્ગયુક્તં તિઙ્ આકાઙ્ક્ષમ્ ।

૮.૨.૯૭ વિચાર્યમાણાનામ્ ।

૮.૨.૯૮ પૂર્વં તુ ભાષાયામ્ ।

૮.૨.૯૯ પ્રતિશ્રવણે ચ ।

૮.૨.૧૦૦ અનુદાત્તં પ્રશ્નાન્તાભિપૂજિતયોઃ ।

૮.૨.૧૦૧ ચિદિતિ ચોપમાઽર્થે પ્રયુજ્યમાને ।

૮.૨.૧૦૨ ઉપરિસ્વિદાસીદિતિ ચ ।

૮.૨.૧૦૩ સ્વરિતમામ્રેડિતેઽસૂયાસમ્મતિકોપકુત્સનેષુ ।

૮.૨.૧૦૪ ક્ષિયાઽઽશીઃપ્રૈષેષુ તિઙ્ આકાઙ્ક્ષમ્ ।

૮.૨.૧૦૫ અનન્ત્યસ્યાપિ પ્રશ્નાખ્યાનયોઃ ।

૮.૨.૧૦૬ પ્લુતાવૈચ ઇદુતૌ ।

૮.૨.૧૦૭ એચોઽપ્રગૃહ્યસ્યાદૂરાદ્ધૂતે
પૂર્વસ્યાર્ધસ્યાદુત્તરસ્યેદુતૌ ।

૮.૨.૧૦૮ તયોર્વ્વાવચિ સંહિતાયામ્ ।

૮.૩.૧ મતુવસો રુ સમ્બુદ્ધૌ છન્દસિ ।

૮.૩.૨ અત્રાનુનાસિકઃ પૂર્વસ્ય તુ વા ।

૮.૩.૩ આતોઽટિ નિત્યમ્ ।

૮.૩.૪ અનુનાસિકાત્ પરોઽનુસ્વારઃ ।

૮.૩.૫ સમઃ સુટિ ।

૮.૩.૬ પુમઃ ખય્યમ્પરે ।

૮.૩.૭ નશ્છવ્યપ્રશાન્ ।

૮.૩.૮ ઉભયથર્ક્ષુ ।

૮.૩.૯ દીર્ઘાદટિ સમાનપદે ।

૮.૩.૧૦ નૄન્ પે ।

૮.૩.૧૧ સ્વતવાન્ પાયૌ ।

૮.૩.૧૨ કાનામ્રેડિતે ।

૮.૩.૧૩ ઢો ઢે લોપઃ ।

૮.૩.૧૪ રો રિ ।

૮.૩.૧૫ ખરવસાનયોર્વિસર્જનીયઃ ।

૮.૩.૧૬ રોઃ સુપિ ।

૮.૩.૧૭ ભોભગોઽઘોઽપૂર્વસ્ય યોઽશિ ।

૮.૩.૧૮ વ્યોર્લઘુપ્રયત્નતરઃ શાકટાયનસ્ય ।

૮.૩.૧૯ લોપઃ શાકલ્યસ્ય ।

૮.૩.૨૦ ઓતો ગાર્ગ્યસ્ય ।

૮.૩.૨૧ ઉઞિ ચ પદે ।

૮.૩.૨૨ હલિ સર્વેષામ્ ।

૮.૩.૨૩ મોઽનુસ્વારઃ ।

૮.૩.૨૪ નશ્ચાપદાન્તસ્ય ઝલિ ।

૮.૩.૨૫ મો રાજિ સમઃ ક્વૌ ।

૮.૩.૨૬ હે મપરે વા ।

૮.૩.૨૭ નપરે નઃ ।

૮.૩.૨૮ ઙ્ણોઃ કુક્ટુક્ શરિ ।

૮.૩.૨૯ ડઃ સિ ધુટ્ ।

૮.૩.૩૦ નશ્ચ ।

૮.૩.૩૧ શિ તુક્ ।

૮.૩.૩૨ ઙમો હ્રસ્વાદચિ ઙમુણ્નિત્યમ્ ।

૮.૩.૩૩ મય ઉઞો વો વા ।

૮.૩.૩૪ વિસર્જનીયસ્ય સઃ ।

૮.૩.૩૫ શર્પરે વિસર્જનીયઃ ।

૮.૩.૩૬ વા શરિ ।

૮.૩.૩૭ કુપ્વોઃ XકXપૌ ચ ।

૮.૩.૩૮ સોઽપદાદૌ ।

૮.૩.૩૯ ઇણઃ ષઃ ।

૮.૩.૪૦ નમસ્પુરસોર્ગત્યોઃ ।

૮.૩.૪૧ ઇદુદુપધસ્ય ચાપ્રત્યયસ્ય ।

૮.૩.૪૨ તિરસોઽન્યતરસ્યામ્ ।

૮.૩.૪૩ દ્વિસ્ત્રિશ્ચતુરિતિ કૃત્વોઽર્થે ।

૮.૩.૪૪ ઇસુસોઃ સામર્થ્યે ।

૮.૩.૪૫ નિત્યં સમાસેઽનુત્તરપદસ્થસ્ય ।

૮.૩.૪૬ અતઃ કૃકમિકંસકુમ્ભપાત્રકુશાકર્ણીષ્વનવ્યયસ્ય ।

૮.૩.૪૭ અધઃશિરસી પદે ।

૮.૩.૪૮ કસ્કાદિષુ ચ ।

૮.૩.૪૯ છન્દસિ વાઽપ્રામ્રેડિતયોઃ ।

૮.૩.૫૦ કઃકરત્કરતિકૃધિકૃતેષ્વનદિતેઃ ।

૮.૩.૫૧ પઞ્ચમ્યાઃ પરાવધ્યર્થે ।

૮.૩.૫૨ પાતૌ ચ બહુલમ્ ।

૮.૩.૫૩ ષષ્ઠ્યાઃ પતિપુત્રપૃષ્ઠપારપદપયસ્પોષેષુ ।

૮.૩.૫૪ ઇડાયા વા ।

૮.૩.૫૫ અપદાન્તસ્ય મૂર્ધન્યઃ ।

૮.૩.૫૬ સહેઃ સાડઃ સઃ ।

૮.૩.૫૭ ઇણ્કોઃ ।

૮.૩.૫૮ નુમ્વિસર્જનીયશર્વ્યવાયેઽપિ ।

૮.૩.૫૯ આદેશપ્રત્યયયોઃ ।

૮.૩.૬૦ શાસિવસિઘસીનાં ચ ।

૮.૩.૬૧ સ્તૌતિણ્યોરેવ ષણ્યભ્યાસાત્ ।

૮.૩.૬૨ સઃ સ્વિદિસ્વદિસહીનાં ચ ।

૮.૩.૬૩ પ્રાક્સિતાદડ્વ્યવાયેઽપિ ।

૮.૩.૬૪ સ્થાઽઽદિષ્વભ્યાસેન ચાભ્યાસય ।

૮.૩.૬૫ ઉપસર્ગાત્ સુનોતિસુવતિસ્યતિસ્તૌતિસ્તોભતિસ્થાસેનય-

સેધસિચસઞ્જસ્વઞ્જામ્ ।

૮.૩.૬૬ સદિરપ્રતેઃ ।

૮.૩.૬૭ સ્તમ્ભેઃ ।

૮.૩.૬૮ અવાચ્ચાલમ્બનાવિદૂર્યયોઃ ।

૮.૩.૬૯ વેશ્ચ સ્વનો ભોજને ।

૮.૩.૭૦ પરિનિવિભ્યઃ સેવસિતસયસિવુસહસુટ્સ્તુસ્વઞ્જામ્ ।

૮.૩.૭૧ સિવાદીનાં વાઽડ્વ્યવાયેઽપિ ।

૮.૩.૭૨ અનુવિપર્યભિનિભ્યઃ સ્યન્દતેરપ્રાણિષુ ।

૮.૩.૭૩ વેઃ સ્કન્દેરનિષ્ઠાયામ્ ।

૮.૩.૭૪ પરેશ્ચ ।

૮.૩.૭૫ પરિસ્કન્દઃ પ્રાચ્યભરતેષુ ।

૮.૩.૭૬ સ્ફુરતિસ્ફુલત્યોર્નિર્નિવિભ્યઃ ।

૮.૩.૭૭ વેઃ સ્કભ્નાતેર્નિત્યમ્ ।

૮.૩.૭૮ ઇણઃ ષીધ્વંલુઙ્લિટાં ધોઽઙ્ગાત્ ।

૮.૩.૭૯ વિભાષેટઃ ।

૮.૩.૮૦ સમાસેઽઙ્ગુલેઃ સઙ્ગઃ ।

૮.૩.૮૧ ભીરોઃ સ્થાનમ્ ।

૮.૩.૮૨ અગ્નેઃ સ્તુત્સ્તોમસોમાઃ ।

૮.૩.૮૩ જ્યોતિરાયુષઃ સ્તોમઃ ।

૮.૩.૮૪ માતૃપિતૃભ્યાં સ્વસા ।

૮.૩.૮૫ માતુઃપિતુર્ભ્યામન્યતરસ્યામ્ ।

૮.૩.૮૬ અભિનિસઃ સ્તનઃ શબ્દસંજ્ઞાયામ્ ।

૮.૩.૮૭ ઉપસર્ગપ્રાદુર્ભ્યામસ્તિર્યચ્પરઃ ।

૮.૩.૮૮ સુવિનિર્દુર્ભ્યઃ સુપિસૂતિસમાઃ ।

૮.૩.૮૯ નિનદીભ્યાં સ્નાતેઃ કૌશલે ।

૮.૩.૯૦ સૂત્રં પ્રતિષ્ણાતમ્ ।

૮.૩.૯૧ કપિષ્ઠલો ગોત્રે ।

૮.૩.૯૨ પ્રષ્ઠોઽગ્રગામિનિ ।

૮.૩.૯૩ વૃક્ષાસનયોર્વિષ્ટરઃ ।

૮.૩.૯૪ છન્દોનામ્નિ ચ ।

૮.૩.૯૫ ગવિયુધિભ્યાં સ્થિરઃ ।

૮.૩.૯૬ વિકુશમિપરિભ્યઃ સ્થલમ્ ।

૮.૩.૯૭ અમ્બામ્બગોભૂમિસવ્યાપદ્વિત્રિકુશેકુશઙ્ક્વઙ્ગુમઞ્જિ-
પુઞ્જિપરમેબર્હિર્દિવ્યગ્નિભ્યઃ સ્થઃ ।
૮.૩.૯૮ સુષામાદિષુ ચ ।
૮.૩.૯૯ એતિ સંજ્ઞાયામગાત્ ।
૮.૩.૧૦૦ નક્ષત્રાદ્વા ।
૮.૩.૧૦૧ હ્રસ્વાત્ તાદૌ તદ્ધિતે ।
૮.૩.૧૦૨ નિસસ્તપતાવનાસેવને ।
૮.૩.૧૦૩ યુષ્મત્તત્તતક્ષુઃષ્વન્તઃપાદમ્ ।
૮.૩.૧૦૪ યજુષ્યેકેષામ્ ।
૮.૩.૧૦૫ સ્તુતસ્તોમયોશ્છન્દસિ ।
૮.૩.૧૦૬ પૂર્વપદાત્ ।
૮.૩.૧૦૭ સુઞઃ ।
૮.૩.૧૦૮ સનોતેરનઃ ।
૮.૩.૧૦૯ સહેઃ પૃતનર્તાભ્યાં ચ ।
૮.૩.૧૧૦ ન રપરસૃપિસૃજિસ્પૃશિસ્પૃહિસવનાદીનામ્ ।
૮.૩.૧૧૧ સાત્પદાદ્યોઃ ।
૮.૩.૧૧૨ સિચો યઙિ ।
૮.૩.૧૧૩ સેધતેર્ગતૌ ।
૮.૩.૧૧૪ પ્રતિસ્તબ્ધનિસ્તબ્ધૌ ચ ।
૮.૩.૧૧૫ સોઢઃ ।
૮.૩.૧૧૬ સ્તમ્ભુસિવુસહાં ચઙિ ।
૮.૩.૧૧૭ સુનોતેઃ સ્યસનોઃ ।
૮.૩.૧૧૮ સદિષ્વઞ્જોઃ પરસ્ય લિટિ ।
૮.૩.૧૧૯ નિવ્યભિભ્યોઽડ્વ્યાવયે વા છન્દસિ ।
૮.૪.૧ રષાભ્યાં નો ણઃ સમાનપદે ।
૮.૪.૨ અટ્કુપ્વાઙ્નુમ્વ્યવાયેઽપિ ।
૮.૪.૩ પૂર્વપદાત્ સંજ્ઞાયામગઃ ।
૮.૪.૪ વનં પુરગામિશ્રકાસિધ્રકાશારિકાકોટરાઽગ્રેભ્યઃ ।
૮.૪.૫ પ્રનિરન્તઃશરેક્ષુપ્લક્ષામ્રકાર્ષ્યખદિર-
પિયૂક્ષાભ્યોઽસંજ્ઞાયામપિ ।
૮.૪.૬ વિભાષૌષધિવનસ્પતિભ્યઃ ।
૮.૪.૭ અહ્નોઽદન્તાત્ ।

૮.૪.૮ વાહનમાહિતાત્ ।

૮.૪.૯ પાનં દેશે ।

૮.૪.૧૦ વા ભાવકરણયોઃ ।

૮.૪.૧૧ પ્રાતિપદિકાન્તનુમ્વિભક્તિષુ ચ ।

૮.૪.૧૨ એકાજુત્તરપદે ણઃ ।

૮.૪.૧૩ કુમતિ ચ ।

૮.૪.૧૪ ઉપસર્ગાદસમાસેઽપિ ણોપદેશસ્ય ।

૮.૪.૧૫ હિનુમીના ।

૮.૪.૧૬ આનિ લોટ્ ।

૮.૪.૧૭ નેર્ગદનદપતપદઘુમાસ્યતિહન્તિયાતિવાતિદ્રાતિપ્સાતિ-
વપતિવહતિશામ્યતિચિનોતિદેગ્ધિષુ ચ ।

૮.૪.૧૮ શેષે વિભાષાઽકખાદાવષાન્ત ઉપદેશે ।

૮.૪.૧૯ અનિતેઃ ।

૮.૪.૨૦ અન્તઃ ।

૮.૪.૨૧ ઉભૌ સાભ્યાસસ્ય ।

૮.૪.૨૨ હન્તેરત્પૂર્વસ્ય ।

૮.૪.૨૩ વમોર્વા ।

૮.૪.૨૪ અન્તરદેશે ।

૮.૪.૨૫ અયનં ચ ।

૮.૪.૨૬ છન્દસ્યૃદવગ્રહાત્ ।

૮.૪.૨૭ નશ્ચ ધાતુસ્થોરુષુભ્યઃ ।

૮.૪.૨૮ ઉપસર્ગાદ્ બહુલમ્ ।

૮.૪.૨૯ કૃત્યચઃ ।

૮.૪.૩૦ ણેર્વિભાષા ।

૮.૪.૩૧ હલશ્ચ ઇજુપધાત્ ।

૮.૪.૩૨ ઇજાદેઃ સનુમઃ ।

૮.૪.૩૩ વા નિંસનિક્ષનિન્દામ્ ।

૮.૪.૩૪ ન ભાભૂપૂકમિગમિપ્યાયીવેપામ્ ।

૮.૪.૩૫ ષાત્ પદાન્તાત્ ।

૮.૪.૩૬ નશેઃ ષાન્તસ્ય ।

૮.૪.૩૭ પદાન્તસ્ય ।

૮.૪.૩૮ પદવ્યવાયેઽપિ ।

૮.૪.૩૯ ક્ષુભ્નાઽઽદિષુ ચ ।

૮.૪.૪૦ સ્તોઃ શ્ચુના શ્ચુઃ ।

૮.૪.૪૧ ષ્ટુના ષ્ટુઃ ।

૮.૪.૪૨ ન પદાન્તાટ્ટોરનામ્ ।

૮.૪.૪૩ તોઃ ષિ ।

૮.૪.૪૪ શાત્ ।

૮.૪.૪૫ યરોઽનુનાસિકેઽનુનાસિકો વા ।

૮.૪.૪૬ અચો રહાભ્યાં દ્વે ।

૮.૪.૪૭ અનચિ ચ ।

૮.૪.૪૮ નાદિન્યાક્રોશે પુત્રસ્ય ।

૮.૪.૪૯ શરોઽચિ ।

૮.૪.૫૦ ત્રિપ્રભૃતિષુ શાકટાયનસ્ય ।

૮.૪.૫૧ સર્વત્ર શાકલ્યસ્ય ।

૮.૪.૫૨ દીર્ઘાદાચાર્યાણામ્ ।

૮.૪.૫૩ ઝલાં જશ્ ઝશિ ।

૮.૪.૫૪ અભ્યાસે ચર્ચ્ચ ।

૮.૪.૫૫ ખરિ ચ ।

૮.૪.૫૬ વાઽવસાને ।

૮.૪.૫૭ અણોઽપ્રગૃહ્યસ્યાનુનાસિકઃ ।

૮.૪.૫૮ અનુસ્વારસ્ય યયિ પરસવર્ણઃ ।

૮.૪.૫૯ વા પદાન્તસ્ય ।

૮.૪.૬૦ તોર્લિ ।

૮.૪.૬૧ ઉદઃ સ્થાસ્તમ્ભોઃ પૂર્વસ્ય ।

૮.૪.૬૨ ઝયો હોઽન્યતરસ્યામ્ ।

૮.૪.૬૩ શશ્છોઽટિ ।

૮.૪.૬૪ હલો યમાં યમિ લોપઃ ।

૮.૪.૬૫ ઝરો ઝરિ સવર્ણે ।

૮.૪.૬૬ ઉદાત્તાદનુદાત્તસ્ય સ્વરિતઃ ।

૮.૪.૬૭ નોદાત્તસ્વરિતોદયમગાર્ગ્યકાશ્યપગાલવાનામ્ ।

૮.૪.૬૮ અ અ ઇતિ ।

ઇતિ

Original from TeX Users Group Eighth Annual: Conference Proceedings
Meeting, Seattle, August 24-26, 1987, TeXniques no. 5,
(Providence, 1988), p. 11.

Proofread by Dhananjay Vaidya dvaidya1 @at@ jhmi.edu and Arun

---

*Ashtadhyayi or Sutrapath of Panini*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*